संस्कृतबोधिनी

प्रथमसोपानम्

संजीवः मजलीकरः

Samskrita Bodhinii

A Study Guide for Spoken Sanskrit Language

Sanjeev Majalikar

- International edition of this book is available on Amazon.com and Pothi.com
-
- The images in this book are sourced from commons.wikimedia.org, goodfreephotos.com, needpix.com, freesvg.org, piklist.com, publicdomainvectors.org, needpix.com. The images are either in the public domain, or under the Creative Commons license (en.wikipedia.org/wiki/Creative_Commons)
- I express my gratitude to my teachers, colleagues, friends, students and family for their continued inspiration and support.

From the same author. Available on Amazon.com and Pothi.com
For beginners after the introductory course:
Panchatantram-The Handbook of Five Strategies: The Complete Book In Simple Sanskrit & English This book is written for students who complete the introductory Level-1 course in spoken Sanskrit. All the 77 stories of Panchantantram – the famous collection of stories have been presented in very simple Sanskrit without losing any detail. For ease of understanding the English translation of each story is also given. Readers can practice reading what they have learnt while enjoying the stories.
Shiksha Bodha–A Guide to Sanskrit Pronunciation (Medium: English) Being a pure phonetic language, correct pronunciation of letters and words is very important in Sanskrit. Shiksha is the science of pronunciation. It is one of the important branches of Sanskrit language studies. This book covers the phonetics, positions of letters, their various classifications, supplemental letters and common mistakes in pronunciation.

Foreword

Samskritam has many qualities which make it uniquely suitable as a World Language. These qualities include its subtlety and power of expression in all spheres of public life from governance to art to science, as well as its logical structure which confers tremendous potential for use with computers. In order to take its seat as a World Language, Samskritam needs to be used by the people of the world! If we are to work toward such a lofty goal, we need textbooks which make this beautiful language accessible to the diversity of human societies around the globe. Such texts should have universal appeal. "Samskrita Bodhinii" achieves just that, and will serve both as a valued tool for language instruction among teachers and students, and as an ideal for how to make Samskritam textbooks at the intermediate and advanced levels as well. With great pleasure I encourage Samskritam lovers around the world to use this beautifully designed text which will help usher in a new era in spreading Samskritam throughout the universe and realizing its true role as a Vishvabhasha!

Swarup Dev **August 2020**

प्रस्तावना

श्रवणं भाषणं पठनं लेखनं चेति भाषायाः साधनाङ्गानि विद्यन्ते । नूतनभाषायाः प्रवेशाय श्रवणं भाषणं च सोपानद्वयं प्रामुख्यं भजते । नूतनछात्रः संभाषणमाध्यमेन भाषां सहजतया अवगम्य अग्रे सरति । पुस्तकमिदं संस्कृतभाषायाः नूतनपठनार्थीनां सौकर्यार्थं ग्रथितमस्ति । अस्य रचनाकार्ये स्फूर्तिः छात्रगणाः शिक्षकवृन्दानि एव । तेभ्यः भूरिशः धन्यवादानर्पये । पुस्तकेस्मिन् भाषायाः सामान्यज्ञानार्थम् अपेक्षिताः विषयाः क्रमबद्धाः । अभ्यासार्थं अनुपाठं प्रश्नाः दत्ताः । प्रयोगदर्शनार्थं संभाषणगुच्छाः कथाश्च यथावकाशं कल्पिताः । शुद्धाशुद्धप्रयोगाः यथायोग्यं प्रदर्शिताः । पुस्तकमिदं प्रयोजनाय भवेदिति आशासे ।

संजीवः मजलीकरः **श्रावणकृष्णाष्टमी विक्रमसंवत् २०७७**

Preface

Listening, speaking, reading and writing are the four important aspects for a language learner. For a person new to a language, listening and speaking form the first stepping stone. This book is designed as a study guide for students wanting to start learning Sanskrit as a spoken language. I heartily thank the student and teacher groups for the inspiration in creating this book. Topics useful for common usage are presented with exercises after each lesson along with stories and correct usages as needed. Hope this book will be helpful.

Sanjeev Majalikar **11-August-2020**

विषयसूची

वर्णमाला

स्वराः

अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ऌ	ए	ऐ	ओ	औ

अनुस्वारः	विसर्गः
ं	ः

व्यञ्जनानि

क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म

य	र	ल	व	श	ष	स	ह

१. परिचयः

भवतः/भवत्याः नाम किम्?

मम नाम ______________________________

२. पदपरिचयः

दीपः	चषकः	स्यूतः	द्विचक्रिका
आसन्दः	चमसः	स्थालिका	दर्पणः
पादत्राणम्	कुञ्चिका	संगणकम्	कङ्कतम्
घटी	संमार्जनी	मिश्रकम्	शय्या
शीतकम्	दूरदर्शनम्	बाष्पस्थाली	मुद्रणयन्त्रम्

३. समीपम्/दूरम्

	एषः बालकः	सः शिक्षकः	
	एषः वैद्यः	सः छात्रः	
	एषः गायकः	सः आरक्षकः	
	एषः पाचकः	सः कृषकः	
	एषः वृद्धः	सः धावकः	

	एषा बालिका	सा शिक्षिका	
	एषा वैद्या	सा छात्रा	
	एषा गायिका	सा नर्तिका	

	एतत् पुस्तकम्	तत् पर्णम्	
	एतत् गृहम्	तत् पुष्पम्	
	एतत् फलकम्	तत् फलम्	

४. लिङ्गविचारः

पुंलिङ्गपदानि - एषः, सः

	एषः पर्वतः	सः कन्दुकः	
	एषः सूर्यः	सः वृक्षः	
	एषः मूषकः	सः सिंहः	
	एषः घटः	सः अग्निः	
	एषः स्यूतः	सः चषकः	
	एषः चन्द्रः	सः दर्पणः	
	एषः शृगालः	सः हरिणः	
	एषः गजः	सः वानरः	

स्त्रीलिङ्गपदानि - एषा, सा

	एषा जवनिका	सा पेटिका	
	एषा उत्पीठिका	सा कर्तरी	
	एषा मापिका	सा दूरवाणी	

नपुंसकलिङ्गपदानि - तत्, एतत्

	एतत् विमानम्	तत् छत्रम्	
	एतत् उपनेत्रम्	तत् व्यजनम्	
	एतत् द्वारम्	एतत् वातायनम्	

५. कः, का, किम्

	एषः कः? एषः बालकः	सः कः? सः शिक्षकः	
	एषः कः? एषः वैद्यः	सः कः? सः छात्रः	
	एषः कः? एषः गायकः	सः कः? सः आरक्षकः	
	एषः कः? एषः पाचकः	सः कः? सः कृषकः	
	एषः कः? एषः वृद्धः	सः कः? सः धावकः	

	एषा का? एषा बालिका	सा का? सा शिक्षिका	
	एषा का? एषा वैद्या	सा का? सा छात्रा	
	एषा का? एषा गायिका	सा का? सा नर्तिका	

	एतत् किम्? एतत् विमानम्	तत् किम्? तत् छत्रम्	
	एतत् किम्? एतत् उपनेत्रम्	तत् किम्? तत् व्यजनम्	
	एतत् किम्? एतत् द्वारम्	तत् किम्? एतत् वातायनम्	

अभ्यासः

	एषः कः? एषः ________	सः कः? सः ________	
	एषः कः? एषः ________	सः कः? सः ________	
	एषः कः? एषः ________	सः कः? सः ________	
	एषः कः? एषः ________	सः कः? सः ________	
	एषः कः? एषः ________	सः कः? सः ________	
	एषः कः? एषः ________	सः कः? सः ________	

	एषा का? एषा ________	सा का? सा ________	
	एषा का? एषा ________	सा का? सा ________	
	एषा का? एषा ________	सा का? सा ________	

	एतत् किम्? एतत् ________	तत् किम्? तत् ________	
	एतत् किम्? एतत् ________	तत् किम्? तत् ________	
	एतत् किम्? एतत् ________	तत् किम्? तत् ________	

६. शुभाशयाः

सुप्रभातम्	
शुभरात्रिः	
शुभदिनम्	
धन्यवादः	
नमस्कारः	
प्रणामः	
अभिनन्दनम्	

७. शरीरम्

(तत्) जत्रु
स्कन्धः
(तत्) उरः
उदरम्
नाभिः
कटिः
(तत्) सक्थि
ऊरुः
(तत्) जानु
जङ्घा
पादः
कक्षः
प्रगण्डः
कूर्परः
पार्श्वः
प्रकोष्ठः
पाणिः/करः
बाहुः
कृकाटिका
पृष्ठम्
शरीरम्
जङ्घा
प्रपदम्
पादः
घुटिका
पार्ष्णिः

८. अस्ति, नास्ति, किम्, आम्, न

	एषः पर्वतः अस्ति किम्?	आम्, एषः पर्वतः अस्ति।
	एषः सूर्यः अस्ति किम्?	आम्, एषः सूर्यः अस्ति।
	सः मूषकः अस्ति किम्?	आम्, सः मूषकः अस्ति।
	सः कन्दुकः अस्ति किम्?	आम्, सः कन्दुकः अस्ति।
	एषः मार्जारः अस्ति किम्?	आम् मार्जारः अस्ति।
	एषः वृक्षः अस्ति किम्?	न, एषः वृक्षः नास्ति। एषः सिंहः अस्ति।
	सः बालकः अस्तिः किम्?	न, सः बालकः नास्ति। सः घटः अस्ति।
	सः अग्निः अस्तिः किम्?	न, सः अग्निः नास्ति। सः गजः अस्ति।
	सः चन्द्रः अस्तिः किम्?	न, सः चन्द्रः नास्ति। सः वृक्षः अस्ति।

	एषा जवनिका अस्ति किम्?	आम्, एषा जवनिका अस्ति।
	एषा उत्पीठिका अस्ति किम्?	आम्,एषा उत्पीठिका अस्ति।
	सा मापिका अस्ति किम्?	आम्, सा मापिका अस्ति।
	सा कर्तरी अस्ति किम्?	आम्, सा कर्तरी अस्ति।
	सा पुष्पाधानी अस्ति किम्?	सा पुष्पाधानी नास्ति।
	एषा वैद्या अस्ति किम्?	न, एषा वैद्या नास्ति। एषा पेटिका अस्ति।
	सा बालिका अस्ति किम्?	न, सा बालिका नास्ति। सा दूरवाणी अस्ति।
	एषा मापिका अस्ति किम्?	न, एषा मापिका नास्ति। एषा नौका अस्ति।
	सा कूपी अस्ति किम्?	न, सा कूपी नास्ति। सा घटी अस्ति।

	एतत् पुस्तकम् अस्ति किम्?	आम्, एतत् पुस्तकम् अस्ति।
	एतत् गृहम् अस्ति किम्?	आम्, एतत् गृहम् अस्ति।
	तत् उपनेत्रम् अस्ति किम्?	आम्, तत् उपनेत्रम् अस्ति।
	तत् वातायनम् अस्ति किम्?	आम्, तत् वातायनम् अस्ति।
	तत् पर्णम् अस्ति किम्?	आम्, तत् पर्णम् अस्ति।
	एतत् फलम् अस्ति किम्?	न, एतत् फलम् नास्ति। एतत् पुष्पम् अस्ति।
	तत् द्वारम् अस्ति किम्?	न, तत् द्वारं नास्ति। तत् व्यजनम् अस्ति।
	एतत् फलकम् अस्ति किम्?	न, एतत् फलकम् नास्ति। एतत् विमानम् अस्ति।
	तत् जलम् अस्ति किम्?	न, तत् जलं नास्ति। तत् छत्रम् अस्ति।
	एतत् पर्णम् अस्ति किम्?	न, एतत् पर्णं नास्ति। एतत् फलकम् अस्ति।

अभ्यासः

	एषः वृक्षः अस्ति किम्?	__________
	सः कन्दुकः अस्ति किम्?	__________
	एषः गजः अस्ति किम्?	__________
	सः अग्निः अस्तिः किम्?	__________
	सः मूषकः अस्ति किम्?	__________
	एषः सूर्यः अस्ति किम्?	__________
	सः बालकः अस्ति किम्?	__________
	एषः सिंहः अस्ति किम्?	__________
	सः आसन्दः अस्ति किम्?	__________

	सा पुष्पाधानी अस्ति किम्?	________________
	सा नौका अस्ति किम्?	________________
	एषा माला अस्ति किम्?	________________
	एषा मापिका अस्ति किम्?	________________
	एषा उत्पीठिका अस्ति किम्?	________________
	सा मापिका अस्ति किम्?	________________
	सा वैद्या अस्ति किम्?	________________
	एषा पेटिका अस्ति किम्?	________________
	एसा घटी अस्ति किम्?	________________

	एतत् फलम् अस्ति किम्?	___________
	एतत् पुस्तकम् अस्ति किम्?	___________
	तत् वातायनम् अस्ति किम्?	___________
	एतत् विमानम् अस्ति किम्?	___________
	एतत् गृहम् अस्ति किम्?	___________
	सा फलकम् अस्ति किम्?	___________
	तत् व्यजनम् अस्ति किम्?	___________
	तत् उपनेत्रम् अस्ति किम्?	___________

९. वाहनानि

चक्रयानम्	
लोकयानम्	
लोहपथी	
विमानम्	
नौका	
त्रिचक्रिका	
द्विचक्रिका	

१०. अत्र, तत्र, अन्यत्र, सर्वत्र, कुत्र

		पुस्तकम् अत्र अस्ति ।
		गृहं तत्र अस्ति ।
		वृक्षः अत्र अस्ति ।
		पर्वतः तत्र अस्ति ।
		द्विचक्रिका अत्र अस्ति ।
		चक्रयानं तत्र अस्ति ।

	अत्र पर्णम् अस्ति ।	फलं कुत्र अस्ति? फलम् अन्यत्र अस्ति ।
	अत्र चन्द्रः अस्ति ।	सूर्यः कुत्र अस्ति? सूर्यः अन्यत्र अस्ति ।
	अत्र व्यजनम् अस्ति ।	उत्पीठिका कुत्र अस्ति? उत्पीठिका अन्यत्र अस्ति ।
	मापिका अत्र अस्ति ।	पेटिका कुत्र अस्ति? पेटिका अन्यत्र अस्ति ।
	मार्जारः अत्र अस्ति ।	गजः कुत्र अस्ति? गजः अन्यत्र अस्ति ।
	वायुः कुत्र अस्ति?	वायुः सर्वत्र अस्ति ।
	जलं कुत्र अस्ति?	जलं सर्वत्र नास्ति ।

सुभाषितम्

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः ।

नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥

अभ्यासः

अस्ति वा नास्ति?

१. शिक्षकः अत्र __________ ।

२. लेखनी अत्र __________ ।

३. वृक्षः अत्र __________ ।

४. पर्वतः अन्यत्र __________ ।

५. फलकम् अत्र __________ ।

६. पादत्राणम् अत्र __________

७. आसन्दः __________ अस्ति ।

८. पुस्तकम् __________ अस्ति ।

९. कन्दुकः अत्र __________ ।

१०. उत्पीठिका अत्र __________ ।

११. दीपः __________ अस्ति ।

१२. उपनेत्रम् __________ अस्ति ।

१३. बालकः __________ अस्ति ।

११. बहुवचनम् – पुंलिङ्गम् - नामपदानि

एषः कः? एषः बालकः ।	एते के? एते बालकाः ।
सः कः? सः अश्वः ।	ते के? ते अश्वाः ।
एषः कः? एषः गजः ।	एते के? एते गजाः ।
सः कः? सः मार्जारः ।	ते के? ते मार्जाराः ।
एषः कः? एषः कन्दुकः ।	एते के? एते कन्दुकाः ।

अभ्यासः

यथोदाहरणं रिक्तस्थानानि पूरयतु ।

१. एषः सिंहः ।	एते सिंहाः ।
२. एषः पुरुषः ।	एते __________
३. एषः व्याघ्रः ।	एते __________
४. एषः पर्वतः ।	एते __________
५. एषः वृक्षः ।	एते __________
६. एषः दीपः ।	एते __________
७. एषः गायकः ।	एते __________
८. एषः सर्पः ।	एते __________
९. एषः दर्पणः ।	एते __________
१०. एषः अजः ।	एते __________
११. सः ग्रहः ।	ते __________
१२. सः शूरः ।	ते __________
१३. सः आसन्दः ।	ते __________
१४. सः शिक्षकः ।	ते __________
१५. सः छात्रः ।	ते __________
१६. सः मृगः ।	ते __________
१७. सः वानरः ।	ते __________
१८. सः वैद्यः ।	ते __________
१९. सः घटः ।	ते __________

बहुवचनम् - पुंलिङ्गम् - अन्यानि नामपदानि

एषः कविः	एते कवयः	सः गुरुः	ते गुरवः
एषः भ्राता	ते भ्रातरः	भवान् चतुरः	भवन्तः चतुराः

अभ्यासः

यथोदाहरणं रिक्तस्थानानि पूरयतु ।

१. एषः मुनिः ।	एते मुनयः ।
२. एषः अग्निः ।	__________
३. एषः वह्निः ।	__________
४. एषः सारथिः ।	__________
५. एषः अतिथिः ।	__________
६. एषः जलधिः ।	__________
७. सः साधुः ।	__________
८. सः वेणुः ।	__________
९. सः बन्धुः ।	__________
१०. सः जन्तुः ।	__________
११. सः पशुः ।	__________
१२. सः परशुः ।	__________
१३. एषः दाता ।	__________
१४. सः नेता ।	__________
१५. सः कर्ता ।	__________

१२. बहुवचनम् – स्त्रीलिङ्गम् - नामपदानि

एषा का? एषा बालिका ।	एताः काः? एताः बालिकाः ।
सा का? सा पिपीलिका ।	ताः काः? ताः पिपीलिकाः ।
एषा का? एषा कुञ्चिका ।	एताः काः? एताः कुञ्चिकाः ।
सा का? सा लेखनी ।	ताः काः? ताः लेखन्यः ।
एषा का? एषा घटी ।	एताः काः? एताः घट्यः ।

अभ्यासः

यथोदाहरणं रिक्तस्थानानि पूरयतु ।

१. एषा पेटिका ।	एताः पेटिकाः ।
२. एषा महिला ।	________
३. एषा माला ।	________
४. एषा शाला ।	________
५. एषा कन्या ।	________
६. एषा लता ।	________
७. एषा वीणा ।	________
८. एषा मापिका ।	________
९. एषा संख्या ।	________
१०. एषा नौका ।	________
११. सा देवी ।	________
१२. सा भगिनी ।	________
१३. सा अङ्कनी ।	________
१४. सा सुन्दरी ।	________
१५. सा पुत्री ।	________
१६. सा मार्जारी ।	________
१७. सा तरुणी ।	________
१८. सा महिषी ।	________
१९. सा सखी ।	________

बहुवचनम् – स्त्रीलिङ्गम् – अन्यानि नामपदानि

एषा मतिः	एताः मतयः
सा धेनुः	ताः धेनवः
एषा माता	एताः मातरः

अभ्यासः

यथोदाहरणं रिक्तस्थानानि पूरयतु ।

१. एषा श्रुतिः ।	एताः श्रुतयः ।
२. एषा स्मृतिः ।	__________
३. एषा भूतिः ।	__________
४. एषा स्तुतिः ।	__________
५. एषा कृतिः ।	__________
६. एषा कान्तिः ।	__________
७. एषा सिद्धिः ।	__________
८. एषा युवतिः ।	__________
९. सा चञ्चुः ।	__________
१०. सा तनुः ।	__________
११. सा रेणुः ।	__________
१२. सा रज्जुः ।	__________
१३. सा हनुः ।	__________
१४. सा स्वसा ।	__________

१३. बहुवचनम् - नपुंसकलिङ्गम् - नामपदानि

एतत् किम्? एतत् गृहम् ।	एतानि कानि? एतानि गृहाणि ।
तत् किम्? तत् फलम् ।	तानि कानि? तानि फलानि ।

अभ्यासः

यथोदाहरणं रिक्तस्थानानि पूरयतु ।

१. एतत् कमलम् ।	एतानि कमलानि ।
२. एतत् पुष्पम् ।	________
३. एतत् चित्रम् ।	________
४. एतत् वनम् ।	________
५. तत् पत्रम् ।	________
६. तत् पात्रम् ।	________
७. तत् मुखम् ।	________
८. तत् मित्रम् ।	________
९. तत् वस्त्रम् ।	________

१४. षष्ठी विभक्तिः

	सः बालकः । तत् पुस्तकम् ।	**बालकस्य** पुस्तकम् ।
	सः अशोकः । सा नौका ।	**अशोकस्य** नौका ।
	सः वृक्षः । तत् फलम् ।	**वृक्षस्य** फलम् ।
	सः **गजः** । सः दन्तः ।	**गजस्य** दन्तः ।
	सः पुरुषः । तत् उपनेत्रम् ।	**पुरुषस्य** उपनेत्रम् ।
	सः महेशः । तत् शिरस्त्रम् ।	**महेशस्य** शिरस्त्रम् ।

	सा बालिका । तत् पुस्तकम् ।	**बालिकायाः** पुस्तकम् ।
	सा महिला । तत् उपनेत्रम् ।	**महिलायाः** उपनेत्रम् ।
	सा **लता** । तत् शिरस्त्रम् ।	**लतायाः** शिरस्त्रम् ।
	सा मालती । तत् छत्रम् ।	**मालत्याः** छत्रम् ।
	सा नलिनी । सा द्विचक्रिका ।	**नलिन्याः** द्विचक्रिका ।
	सा विशालाक्षी । तत् मुखम् ।	**विशालाक्ष्याः** मुखम् ।

	तत् **गृहम्** । तत् वातायनम् ।	**गृहस्य** वातायनम् ।
	तत् वाहनम् । तत् चक्रम् ।	**वाहनस्य** चक्रम् ।
	तत् सस्यम् । तत् फलम् ।	**सस्यस्य** फलम् ।
	तत् मित्रम् । सः कन्दुकः ।	**मित्रस्य** कन्दुकः ।
	तत् पुष्पम् ।	**पुष्पस्य** गन्धः ।

षष्ठी विभक्तिः – अन्यपदानि

कविः	कवेः अङ्गुली	युवतिः	युवतेः मुखम्
गुरुः	गुरोः पुस्तकम्	धेनुः	धेनोः पादः
पिता	पितुः कार्यालयः	माता	मातुः पाकशाला
अहम्	मम गृहम्	भवान्	भवतः वाहनम्

१५. तस्य, एतस्य, तस्याः, एतस्याः

	एषः बालकः । **एतस्य** नाम रामः ।	**सः** शिक्षकः । **तस्य** नाम शिवः ।	
	एषः वैद्यः । एतस्य नाम कृष्णः ।	सः छात्रः । तस्य नाम महेशः ।	
	सः ग्रहः । तस्य नाम शनिः ।	सः पर्वतः । तस्य नाम हिमालयः ।	
	एषा महिला । एतस्याः नाम कला ।	सा छात्रा । तस्याः नाम रमा ।	
	एषा बालिका । एतस्याः नाम नीला ।	सा बालिका । तस्याः नाम मालती ।	
	तत् मित्रम् । तस्य नाम रमेशः ।	तत् नगरम् । नगरस्य नाम देहली ।	

अभ्यासः

चित्रं दृष्ट्वा उत्तरं लिखतु।

	__________ (गजः) कर्णः।
	__________ (मार्जारः) पुच्छम्।
	__________ (बालकः) स्यूतः।
	__________ (बालिका) उपनेत्रम्।
	__________ (छात्रा) हस्तः।
	__________ (नदी) जलम्।
	__________ (चक्रयानम्) चालकः।
	__________ (गृहम्) द्वारम्।

षष्ठी विभक्तिः – बहुवचनरूपाणि

१. पर्वतस्य शिखरम्	पर्वतानां शिखराणि
२. महिलायाः शाटिका	महिलानां शाटिकाः
३. वाहनस्य चालकः	वाहनानां चालकाः
४. मम राष्ट्रम्	अस्माकं राष्ट्रम्
५. भवतः गृहम्	भवतां गृहम्
६. भवत्याः आभरणम्	भवतीनाम् आभरणानि
७. मुनेः आश्रमः	मुनीनाम् आश्रमाः
८. शत्रोः आयुधम्	शत्रूणाम् आयुधानि
९. भ्रातुः कन्दुकः	भ्रातॄणां कन्दुकाः
१०. युवतेः स्यूतः	युवतीनां स्यूताः
११. धेनोः पुच्छम्	धेनूनां पुच्छानि
१२. मातुः शिशुः	मातॄणां शिशवः
१३. तस्य नगरम्	तेषां नगरम्
१४. एतस्य वाहनम्	एतेषां वाहनानि
१५. तस्याः कार्यालयः	तासां कार्यालयः
१६. एतस्याः आपणः	एतासां आपणाः

सुभाषितम्

दुर्बलस्य बलं राजा बालानां रोदनं बलम् ।
बलं मूर्खस्य मौनित्वं चोराणाम् अनृतं बलम् ॥

१६. कस्य, कस्याः

१. एषः कस्य स्यूतः?	एषः सुरेशस्य स्यूतः ।
२. एषा कस्याः पेटिका?	एषा पार्वत्याः पेटिका ।
३. एतत् कस्य गृहम्?	एतत् मित्रस्य गृहम् ।
४. सः कस्य गुरुः?	सः मम गुरुः ।

अभ्यासः

यथोदाहरणं रिक्तस्थानानि पूरयतु ।

१. एतत् रामस्य भवनम् । एतत् कस्य भवनम्?

२. एषः उपवनस्य मार्गः । एषः ______ मार्गः?

३. एतत् भवतः नगरम् । एतत् ______ नगरम्?

४. एषा भवत्याः दूरवाणी । एषा ______ दूरवाणी?

५. एतत् वृक्षस्य पर्णम् । एतत् ______ पर्णम्?

६. एषः पार्वत्याः पतिः । एषः ______ पतिः?

७. सा रमेशस्य पत्नी । सा ______ पत्नी?

८. सः धनस्य कोशः । सः ______कोशः?

९. तत् नद्याः जलम् । तत् ______जलम्?

१०. तत् गुरोः पादत्राणम् । तत् ______ पादत्राणम्?

११. सः वैद्यायाः चिकित्सालयः । सः ______चिकित्सालयः?

१२. सा सौचिकस्य कर्तरी । सा ______ कर्तरी?

१७. पुरतः, पृष्ठतः दिशावाचकाः

	बालिकायाः पुरतः संगणकम् अस्ति ।
	मेघस्य पृष्ठतः सूर्यः अस्ति ।
	निधानिकायाः उपरि दीपः अस्ति ।
	छत्रस्य अधः मालती अस्ति ।
	शिक्षकस्य वामतः फलकम् अस्ति ।
	मातुः दक्षिणतः पुत्री अस्ति ।

सुभाषितम्

नरस्स्याभरणं रूपं रूपस्याभरणं गुणः ।

गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा ॥

अभ्यासः

रिक्तस्थानानि पूरयतु ।

	बालकस्य _______ बालिका अस्ति ।
	पुत्र्याः _______ माता अस्ति ।
	मेघः सूर्यस्य _______ अस्ति ।
	पात्रस्य _______ चुल्ली अस्ति ।
	भगिन्याः _______ सहोदरः अस्ति ।
	पात्रस्य _______ पिधानम् अस्ति ।

१८. षड् रसाः (रुचिः)

	एतत् लवणम् । लवणस्य रुचिः लवणः ।
	एषः निम्बूकः । निम्बूकस्य रुचिः आम्लः ।
	एषा शर्करा । शर्करायाः रुचिः मधुरः ।
	एषा मरीचिका । मरीचिकायाः रुचिः कटुः ।
	एतत् कारवेल्लम् । कारवेल्लस्य रुचिः तिक्तः ।
	एतत् आमलकम् । आमलकस्य रुचिः कषायः ।

१९. क्रियापदानि - वर्तमानकालः

	सः चलति		सा लिखति
	एषः खादति		एषा पठति
	महेशः पिबति		लता पश्यति
	पुरुषः गच्छति		महिला हसति
	वृद्धः तिष्ठति		बालिका धावति
	भवान् नयति		भवती खेलति

अहम् आगच्छामि
अहं गच्छामि
अहं खादामि
अहं पिबामि
अहं लिखामि
अहं पठामि
अहं धावामि
अहं खेलामि

अभ्यासः

यथोदाहरणं वाक्यानि लिखतु ।

सः चलति	अहं चलामि	सा लिखति	अहं चलामि
सः खादति		सा पठति	
सः पिबति		सा पश्यति	
एषः गच्छति		एषा हसति	
एषः तिष्ठति		एषा धावति	
भवान् नयति		भवती खेलति	
सः वहति		सा उपविशति	
सः क्रीडति		सा प्रार्थयति	
सः कूर्दति		सा पतति	
सः स्मरति		सा मिलति	
सः त्यजति		सा पृच्छति	
महेशः वसति		मालती इच्छति	
भक्तः ध्यायति		भक्ता नृत्यति	
चोरः चोरयति		रमा क्षालयति	
अर्चकः पूजयति		वैद्या प्रेषयति	
वैद्यः स्थापयति		वैद्या सूचयति	
गुरुः कथयति		माला कथयति	

संभाषणम् ।

मनोजः – सुप्रभातम् । भवती किं करोति?

राधा– सुप्रभातम् । अहं प्रातःभ्रमणं करोमि ।

मनोजः – उत्तमम् । भवती अनन्तरं किं करोति?

राधा - अहम् अनन्तरं फलं खादामि । विद्यालयं गच्छामि । भवान् प्रातः किं करोति?

मनोजः – अहं प्रातः दन्तधावनं करोमि । अनन्तरं दुग्धं पिबामि ।

राधा – अनन्तरं भवान् विद्यालयं गच्छति किम्?

मनोजः – आम् । अहं विद्यालयं गच्छामि ।

राधा – भवतः शिक्षकस्य नाम किम्?

मनोजः –मम शिक्षकस्य नाम समीरः। सः मम गृहस्य समीपे वसति।

राधा – मम शिक्षिकायाः नाम सुमा । सा विद्यालयस्य समीपे वसति ।

मनोजः – भवत्याः गृहस्य समीपे किम् अस्ति?

राधा – मम गृहस्य समीपे उपवनम् अस्ति । तत्र पुष्पाणि भवन्ति ।

मनोजः – तत्र वानराः अपि सन्ति किम्?

राधा – आम्. तत्र वानराः कूर्दन्ति । खगाः कूजन्ति ।

मनोजः – मम गृहस्य समीपे कूपी अस्ति। जनाः कूप्याः जलं नयन्ति।

राधा – तत्र मण्डूकाः सन्ति किम्?

मनोजः – न तत्र मण्डूकाः न सन्ति ।

राधा – अस्तु । सन्तोषः। इदानीं विलम्बः भवति। अहं गच्छामि।

मनोजः – अस्तु । अहम् अपि गच्छामि ।

२०. क्रियापदानि – वर्तमानकालः – बहुवचनम्

एषः किं करोति? सः गच्छति ।	एते किं कुर्वन्ति? एते गच्छन्ति ।
एषः किं करोति? एषः तिष्ठति ।	एते किं कुर्वन्ति? एते तिष्ठन्ति ।
सा किं करोति? सा हसति ।	ताः किं कुर्वन्ति? ताः हसन्ति ।
एषा किं करोति? एषा धावति ।	एताः किं कुर्वन्ति? एताः धावन्ति
भवान् किं करोति? भवान् पठति ।	भवन्तः किं कुर्वन्ति? भवन्तः पठन्ति ।
भवती किं करोति? भवती गायति ।	भवत्यः किं कुर्वन्ति? भवत्यः गायन्ति ।
भवती किं करोति? भवती गायति ।	भवत्यः किं कुर्वन्ति? भवत्यः पठन्ति ।

वयं आगच्छामः
वयं गच्छामः
वयं खादामः
वयं पिबामः
वयं लिखामः
वयं पठामः
वयं धावामः
वयं खेलामः

अभ्यासः

यथोदाहरणं वाक्यानि लिखतु ।

सः चलति	ते चलन्ति	सा लिखति	ताः लिखन्ति
सः खादति		सा पठति	
सः पिबति		सा पश्यति	
एषः गच्छति		एषा हसति	
एषः तिष्ठति		एषा धावति	
भवान् नयति		भवती खेलति	
सः वहति		सा उपविशति	
भवान् क्रीडति		एषा क्रीडति	
वानरः कूर्दति		एषा पतति	
सः स्मरति		अहं मिलामि	
एषः त्यजति		सा पृच्छति	
महेशः वसति		मालती इच्छति	
भक्तः ध्यायति		भवती नृत्यति	
चोरः चोरयति		अहं क्षालयामि	
अर्चकः पूजयति		वैद्या प्रेषयति	
अहं स्थापयामि		अहं सूचयामि	
सेवकः मार्जयति		उमा चालयति	

२१. क्रियापदानि - आज्ञा, प्रार्थना, इच्छा

एकवचनम्	बहुवचनम्
भवान् पठतु ।	भवन्तः पठन्तु ।
बालकः पश्यतु ।	बालकाः क्रीडन्तु ।
सा चलतु ।	ताः चलन्तु ।
भवती धावतु ।	भवत्यः धावन्तु ।

अभ्यासः

यथोदाहरणं वाक्यानि लिखतु ।

सः चलति	सः चलतु	सा लिखति	सा लिखन्तु
सः खादति		सा पठति	
सः पिबति		सा पश्यति	
एषः गच्छति		एषा हसति	
भवान् नयति		भवती खेलति	
सः वहति		सा उपविशति	
भवान् क्रीडति		एषा क्रीडति	
वानरः कूर्दति		एषा पतति	
सः स्मरति		ते मिलन्ति	
भवान् त्यजति		ताः पृच्छन्ति	
भवती वसति		मालती इच्छति	
भक्तः ध्यायति		भवती नृत्यति	
अर्चकः पूजयति		वैद्या प्रेषयति	
धनिकः ददाति		गायिका गायति	
छात्रः शक्नोति		वृद्धा रोदिति	
ग्राहकः क्रीणाति		भवती जानाति	
देवः करोति		छात्रा शृणोति	

२२. शीघ्रम्, मन्दम्, उच्चैः, शनैः

अश्वः शीघ्रं धावति	कूर्मः मन्दं चलति
बालकः उच्चैः हसति	बालकः शनैः वदति

अभ्यासः

रिक्तस्थानानि पूरयतु ।

१. सिंहः _______________ गर्जति ।

२. शशकः _______________ धावति ।

३. पिपीलिका _______________ गच्छति ।

४. चोरः _______________ धावति ।

५. अग्निः _______________ ज्वलति ।

६. भक्तः _______________ गायति ।

७. संस्कृताभ्यासः _______________ भवति ।

८. विमानं _______________ गच्छति ।

९. नदी _______________ वहति ।

१०. कालः _______________ गच्छति ।

११. भवान् _______________ पठति ।

२३. कथम्

१. अश्वः कथं धावति? अश्वः शीघ्रं धावति ।

२. कूर्मः कथं चलति? कूर्मः मन्दं चलति ।

३. छात्रा कथं पठति? छात्रा उच्चैः पठति ।

४. गजः कथं गच्छति? गजः शनैः गच्छति ।

५. अहं कथं गायामि? अहं मधुरं गायामि ।

६. एषा कथं नृत्यति? एषा सुन्दरं नृत्यति ।

७. भवती कथम् अस्ति? भवती सम्यक् अस्ति ।

८. वाहनं कथम् अस्ति? वाहनम् उत्तमम् अस्ति ।

९. नगरस्य मार्गः कथम् अस्ति? नगरस्य मार्गः समीचीनः अस्ति।

मार्गः सम्यक्	मार्गः समीचीनः	मार्गः उत्तमः
घटी सम्यक्	घटी समीचीना	घटी उत्तमा
पुस्तकं सम्यक्	पुस्तकं समीचीनम्	पुस्तकम् उत्तमम्

अभ्यासः

पदानि योजयतु ।

चित्रं	उत्तमा अस्ति ।
लेखनी	समीचीनः अस्ति ।
वायुः	सुन्दरम् अस्ति ।
प्रश्नः	मन्दं वहति ।

२४. अन्तः, बहिः

पर्यटकः - एतत् कस्य भवनम्?

मार्गदर्शकः - एतत् राष्ट्राध्यक्षस्य भवनम् ।

पर्यटकः - भवनात् बहिः के तिष्ठन्ति?

मार्गदर्शकः - भवनात् बहिः आरक्षकाः तिष्ठन्ति ।

पर्यटकः - आरक्षकाः किं कुर्वन्ति?

मार्गदर्शकः - आरक्षकाः इतस्ततः चलन्ति। ते भवनस्य रक्षणं कुर्वन्ति।

पर्यटकः - भवनस्य अन्तः के जनाः सन्ति?

मार्गदर्शकः - भवनस्य अन्तः राष्ट्रस्य अध्यक्षः वसति । तस्य कुटुम्बजनाः अपि अन्तः वसन्ति ।

पर्यटकः - भवनात् बहिः केषां वाहनानि सन्ति?

मार्गदर्शकः - भवनात् बहिः सचिवानां वाहनानि सन्ति ।

अन्तः	बहिः	इतस्ततः

अभ्यासः

अन्तः, बहिः - रिक्तस्थानं पूरयतु ।

१. गृहात् __________ नदी अस्ति ।

२. गुहायाः __________ सिंहः वसति ।

३. ग्रन्थालयस्य __________ पुस्तकानि सन्ति ।

२५. द्वितीया विभक्तिः

	सः पुरुषः । सः भारः ।	पुरुषः किं वहति? पुरुषः **भारं** वहति ।
	सा नलिनी । सा द्विचक्रिका ।	नलिनी किं चालयति? नलिनी **द्विचक्रिकां** चालयति ।
	सा बालिका । सा दूरवाणी ।	बालिका किं पश्यति? बालिका **दूरवाणीं** पश्यति ।
	सः अशोकः । तत् भोजनम् ।	अशोकः किं खादति? अशोकः **भोजनं** खादति ।
	सः कपिलः । तत् पेयम् ।	कपिलः किं पिबति? कपिलः **पेयं** पिबति ।
	सः बालकः । तत् पुस्तकम् ।	बालकः किं पठति? बालकः **पुस्तकं** पठति ।

द्वितीया विभक्तिः – बहुवचनरूपाणि

१. बालकः स्यूतं नयति ।	बालकः स्यूतान् नयति ।
२. सौचिकः वस्त्रं सीव्यति ।	सौचिकः वस्त्राणि सीव्यति ।
३. बालिका पेटिकां पश्यति ।	बालिका पेटिकाः पश्यति ।
४. लेखकः लेखनीं क्रीणाति ।	लेखकः लेखनीः क्रीणाति ।
५. लोकः कविं नमति ।	लोकः कवीन् नमति ।
६. वीरः शत्रुं जयति ।	वीरः शत्रून् जयति ।
७. बालिका भ्रातरं वदति ।	बालिका भ्रातॄन् वदति ।
८. भक्तः स्तुतिं पठति ।	भक्तः स्तुतीः पठति ।
९. गोपालः धेनुं पश्यति ।	गोपालः धेनूः पश्यति ।
१०. पिता दुहितरम् आह्वयति ।	भ्राता दुहितॄः आह्वयति ।

अभ्यासः

पदानि योजयतु ।

चित्रकारः	काव्यं लिखति ।
अर्चकः	केशं कर्तयति ।
कविः	भोजनं पचति ।
क्षौरिकः	वस्त्रं क्षालयति
धीवरः	चित्रं लिखति ।
रजकः	मत्स्यं गृह्णाति ।
सूदः	देवं पूजयति ।

२६. सप्ताहस्य दिनानि

सोमवासरः	प्रपरह्यः	
मङ्गलवासरः	परह्यः	
बुधवासरः	ह्यः	
गुरुवासरः	अद्य	
शुक्रवासरः	श्वः	
शनिवासरः	परश्वः	
रविवासरः	प्रपरश्वः	

अभ्यासः

अद्य सोमवासरः ।	प्रपरह्यः कः वासरः?
श्वः मङ्गलवासरः ।	परह्यः कः वासरः?
परह्यः बुधवासरः ।	ह्यः कः वासरः?
प्रपरह्यः गुरुवासरः ।	अद्य कः वासरः?
ह्यः शुक्रवासरः ।	श्वः कः वासरः?
प्रपरश्वः शनिवासरः ।	परश्वः कः वासरः?
परश्वः रविवासरः ।	प्रपरश्वः कः वासरः?
अद्य मङ्गलवासरः ।	ह्यः कः वासरः?
श्वः सोमवासरः ।	ह्यः कः वासरः?
परश्वः बुधवासरः ।	अद्य कः वासरः?

२७. तृतीया विभक्तिः

	सः अशोकः । सः चमसः ।	अशोकः केन खादति? अशोकः **चमसेन** खादति ।
	सः कपिलः । सः चषकः ।	कपिलः केन पिबति? कपिलः **चषकेण** पिबति ।
	सः अग्निः । सः प्रकाशः ।	केन प्रकाशः भवति? अग्निना प्रकाशः भवति ।
	सा नलिनी । सा द्विचक्रिका ।	नलिनी कया गच्छति? नलिनी **द्विचक्रिकया** गच्छति ।

तृतीया विभक्तिः – बहुवचनरूपाणि

१. शुनकः पादेन चलति ।	शुनकः पादैः चलति ।
२. पाचकः छुरिकया कर्तयति ।	पाचकः छुरिकाभिः कर्तयति ।
३. लेखकः लेखन्या लिखति ।	लेखकः लेखनीभिः लिखति ।
४. कृषकः परशुना कर्तयति ।	कृषकः परशुभिः कर्तयति ।

सुभाषितम्

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥

२८. सह, विना

१. गुरुः छात्रेण सह पठति ।

२. अशोकः मित्रेण सह मिलति ।

३. माला सख्या सह विद्यालयं प्राप्नोति ।

४. कृष्णः हरिणा सह धावति ।

५. वीरः शत्रुणा सह युद्ध्यति ।

६. बालकः पित्रा सह आपणं गच्छति ।

७. भगिनी युवत्या सह आगच्छति ।

८. वत्सः धेन्वा सह चरति ।

९. पुत्री मात्रा सह वसति ।

१०. क्रीडालुः कन्दुकेन सह क्रीडति ।

११. शिक्षकं विना शिक्षणं कठिनम् ।

१२. उपनेत्रं विना अहं चित्रं पश्यामि ।

१३. मालां विना नलिनी आगच्छति ।

१४. लेखनीं विना लेखनं न साध्यम् ।

१५. अशोकः अतिथिं विना भोजनं करोति ।

१६. गुरुम् विना ज्ञानं न शक्यम् ।

१७. पितरं विना भ्राता खादति ।

१८. मतिं विना गतिः नास्ति ।

१९. धेनुं विना वत्सः चरति ।

२०. मातरं विना शिशुः रोदिति ।

संभाषणम्

महेशः – भवान् श्वः कुत्र गच्छति?

गिरीशः – अहं श्वः श्रीनगरं गच्छामि ।

महेशः – श्रीनगरं भवान् कथं गच्छति?

गिरीशः – अहं श्रीनगरं विमानयानेन गच्छामि ।

महेशः - भवान् तत्र केन सह गच्छति?

गिरीशः – अहं तत्र मम भगिन्या सह गच्छामि ।

महेशः - तत्र कः कार्यक्रमः भवति?

गिरीशः – तत्र मम भगिन्याः नृत्यकार्यक्रमः भवति ।

महेशः – अस्तु । भवतः प्रवासः सुखकरः भवतु ।

अभ्यासः

पदानि योजयतु ।

श्रमिकः	परिश्रमं विना न भवति ।
वृषभशाकटः	वायुं विना न जीवति ।
चित्रकारः	जलं विना न भवति ।
मानवः	सर्पेण सह युद्ध्यति ।
विमानम्	मन्दं गच्छति ।
स्नानम्	खनित्रेण खनति ।
सिद्धिः	इन्धनं विना न चलति ।
नकुलः	कूर्चेण लिखति ।

२९. संख्याः

१	एकः/एका/एकम्	११	एकादश
२	द्वौ/द्वे/द्वे	१२	द्वादश
३	त्रयः/तिस्रः/त्रीणि	१३	त्रयोदश
४	चत्वारः/चतस्रः/चत्वारि	१४	चतुर्दश
५	पञ्च	१५	पञ्चदश
६	षट्	१६	षोडश
७	सप्त	१७	सप्तदश
८	अष्ट	१८	अष्टादश
९	नव	१९	एकोनविंशतिः
१०	दश	२०	विंशतिः

३०. कति?

	कति पुरुषाः सन्ति? त्रयः पुरुषाः सन्ति ।
	कति बालिकाः सन्ति? चतस्रः बालिकाः सन्ति ।
	कति फलानि सन्ति? पञ्च फलानि सन्ति ।
	कति पिपीलिकाः सन्ति? षट् पिपीलिकाः सन्ति ।

संख्या-कोष्ठकः २१-६०			
एकविंशतिः	एकत्रिंशत्	एकचत्वारिंशत्	एकपञ्चाशत्
द्वाविंशतिः	द्वात्रिंशत्	द्वा/द्विचत्वारिंशत्	द्वा/द्विपञ्चाशत्
त्रयोविंशतिः	त्रयस्त्रिंशत्	त्रि/त्रयश्चत्वारिंशत्	त्रि/त्रयःपञ्चाशत्
चतुर्विंशतिः	चतुस्त्रिंशत्	चतुश्चत्वारिंशत्	चतुःपञ्चाशत्
पञ्चविंशतिः	पञ्चत्रिंशत्	पञ्चचत्वारिंशत्	पञ्चपञ्चाशत्
षड्-विंशतिः	षट्-त्रिंशत्	षट्-चत्वारिंशत्	षट्-पञ्चाशत्
सप्तविंशतिः	सप्तत्रिंशत्	सप्तचत्वारिंशत्	सप्तपञ्चाशत्
अष्टाविंशतिः	अष्टात्रिंशत्	अष्ट/अष्टाचत्वारिंशत्	अष्ट/अष्टापञ्चाशत्
नवविंशतिः	नवत्रिंशत्	नवचत्वारिंशत्	नवपञ्चाशत्
त्रिंशतिः	चत्वारिंशत्	पञ्चाशत्	षष्टिः

अभ्यासः

उत्तराणि लिखतु ।

१. सप्तविंशतिः + नव = ______________

२. पञ्चाशत् + एकादश = ______________

३. षोडश + पञ्चविंशतिः = ______________

४. षष्टिः - द्वे = ______________

५. सप्ताहस्य कति दिनानि?

६. संवत्सरस्य कति मासाः?

संख्या-कोष्ठकः ६१-१००			
एकषष्टिः	एकसप्ततिः	एकाशीतिः	एकनवतिः
द्वा/द्विषष्टिः	द्वा/द्विसप्ततिः	द्व्यशीतिः	द्वा/द्विनवतिः
त्रि/त्रयःषष्टिः	त्रि/त्रयस्सप्ततिः	त्र्यशीतिः	त्रि/त्रयोनवतिः
चतुष्षष्टिः	चतुस्सप्ततिः	चतुरशीतिः	चतुर्नवतिः
पञ्चषष्टिः	पञ्चसप्ततिः	पञ्चाशीतिः	पञ्चनवतिः
षट्-षष्टिः	षट्-सप्ततिः	षडशीतिः	षण्णवतिः
सप्तषष्टिः	सप्तसप्ततिः	सप्ताशीतिः	सप्तनवतिः
अष्ट/अष्टाषष्टिः	अष्ट/अष्टासप्ततिः	अष्टाशीतिः	अष्ट/अष्टानवतिः
नवषष्टिः	नवसप्ततिः	नवाशीतिः	नवनवतिः
सप्ततिः	अशीतिः	नवतिः	शतम्

शतम् (१००)	१००	खर्वः	वृन्दः x १०
सहस्रम्	१०००	निखर्वः	खर्वः x १०
अयुतम्	१०,०००	शङ्खः/शङ्कुः	निखर्वः x १०
लक्षम्	१००,०००	पद्मः	शङ्खः x १०
प्रयुतम्/नियुतम्	१,०००,०००	सागरः/जलधिः	पद्मः x १०
कोटिः	१०,०००,०००	अन्त्यम्	सागरः x १०
अर्बुदम्	१००,०००,०००	मध्यम्	अन्त्यम् x १०
वृन्दः/अब्जम्	१,०००,०००,०००	परार्धम्	मध्यम् x १०

३१. समयः कः?

द्वादशवादनम्	नववादनम्	सपादचतुर्वादनम्
सार्धद्विवादनम्	सार्धपञ्चवादनम्	पादोनत्रिवादनम्

अभ्यासः

____________	____________	____________
____________	____________	____________

३२. कदा

१. गुरुः कदा पाठयति?	गुरुः दशवादने पाठयति ।
२. मित्राणि कदा गच्छन्ति?	मित्राणि एकवादने गच्छन्ति ।
३. भोजनं कदा भवति?	भोजनं सार्धैकवादने भवति ।
४. वयं कदा क्रीडामः?	वयं पादोनत्रिवादने क्रीडामः ।
५. भवान् कदा गायति?	भवान् सपादाष्टवादने गायति ।
६. भवती कदा पूजयति?	भवती प्रातः पूजयति ।
७. शिशुः कदा निद्राति?	शिशुः रात्रौ निद्राति ।

अभ्यासः

१. पिता कदा चित्रं पश्यति?

२. माता कदा ग्रन्थालयं गच्छति?

३. भवान् कदा खादति?

४. भवती कदा उत्तिष्ठति?

५. वृष्टिः कदा भवति?

६. इदानीं समयः कः?

७. पठनस्य समयः कदा?

८. अद्य सूर्यास्तः कदा भवति?

समयः कः?	✓	कति वादनम्?	✗
समयः कः?	✓	घण्टा कः?	✗

३३. चतुर्थी विभक्तिः

१. धनिकः पुत्राय धनं ददाति ।

२. अशोकः मित्राय पुस्तकं ददाति ।

३. रमा उमायै शर्करां ददाति ।

४. सुमा नलिन्यै पत्रं प्रेषयति ।

५. माता शिशवे दुग्धं ददाति ।

६. आरक्षकः चोराय कुप्यति ।

७. दुर्जनः मित्राय द्रुह्यति ।

८. निर्धनः धनिकाय असूयति ।

९. मह्यं मधुरं रोचते ।

१०. गुरवे नमः ।

चतुर्थी विभक्तिः – कोष्ठकः

एकवचनम्	बहुवचनम्	एकवचनम्	बहुवचनम्
बालकाय	बालकेभ्यः	बालिकायै	बालिकाभ्यः
कवये	कविभ्यः	युवतये	युवतिभ्यः
गुरवे	गुरुभ्यः	धेनवे	धेनुभ्यः
पित्रे	पितृभ्यः	मात्रे	मातृभ्यः
भवते	भवद्भ्यः	भवत्यै	भवतीभ्यः

सर्वेभ्यः नमः	✓	सर्वेभ्यः नमस्कारः	✗
नमस्ते	✓	सर्वेभ्यः नमस्ते	✗

अभ्यासः

रिक्तस्थानानि पूरयतु ।

१. बालकः कस्मै खाद्यं ददाति?

बालकः ____________ (मार्जारः) खाद्यं ददाति ।

२. पुत्रः ____________ (पिता) युतकं ददाति ।

३. अहं ____________ (भगिनी) उपायनं प्रेषयामि ।

४. मूर्खः ____________ (पण्डितः) असूयति ।

५. ____________ (माता) नमः ।

६. ____________ (भवान्) तिक्तं न रोचते ।

३४. किमर्थम्, तस्य कृते

१. छात्रः किमर्थं पठति?	छात्रः ज्ञानार्थं पठति ।
२. गायकः किमर्थं गायति?	गायकः मनोरञ्जनार्थं गायति ।
३. विदूषकः किमर्थं हसति?	विदूषकः विनोदार्थं हसति ।
४. हरिः किमर्थं क्रीडति?	हरिः संतोषार्थं क्रीडति ।
५. शिशुः किमर्थं रोदिति?	शिशुः दुग्धार्थं रोदिति ।
६. व्याधः किमर्थं धावति?	व्याधः मृगस्य कृते धावति ।
७. बालिका किमर्थं गच्छति?	बालिका शालायाः कृते गच्छति ।
८. धेनुः किमर्थं नर्दति?	धेनुः वत्सस्य कृते नर्दति ।
९. चोरः किमर्थं चोरयति?	चोरः धनस्य कृते चोरयति ।
१०. वीरः किमर्थं युद्ध्यति?	वीरः जयस्य कृते युद्ध्यति ।

संभाषणम्

मालती – एतस्य युतकस्य कियत् मूल्यम्?

आपणिकः – एतस्य पञ्चाशत् रूप्यकाणि ।

मालती – पादत्राणस्य कियत् मूल्यम्?

आपणिकः – पादत्राणस्य शतं रूप्यकाणि ।

मालती – एतस्य ऊरुकस्य कियत् मूल्यम्?

आपणिकः – ऊरुकस्य षष्टिः रूप्यकाणि । किमर्थं सर्वं मूल्यं पृच्छति?

मालती – श्वः मम पितुः जन्मदिनम् । तस्मै किञ्चित् उपायनं ददामि ।

आपणिकः – भवत्याः पित्रे किं रोचते?

मालती – तस्मै युतकं रोचते ।

आपणिकः – अस्तु । तर्हि युतकं क्रीणातु । कति आवश्यकानि?

मालती – मम समीपे पञ्चाशत् रूप्यकाणि सन्ति। एकं युतकं पर्याप्तम्।

आपणिकः – पादत्राणम् अपि क्रीणातु । धनम् अनन्तरं ददातु ।

मालती – न आवश्यकम् । केवलम् एकं युतकं पर्याप्तम् । एतत् धनं स्वीकरोतु ।

आपणिकः – अस्तु । युतकपेटिकां गृह्णातु । धन्यवादः ।

शतं रूप्यकाणि	✓	शतानि रूप्यकाणि	✗
केवलम्	आवश्यकम्	पर्याप्तम्	अपि

सुभाषितम्

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।

परोपकाराय दुहन्ति गावः परोपकारार्थम् इदं शरीरम् ॥

३५. सप्तमी विभक्तिः

	महेशः कुत्र उपविशति? महेशः आसन्दे उपविशति ।
	बालिका कुत्र अस्ति? बालिका शय्यायाम् अस्ति ।
	बकः कुत्र तरति? बकः जले तरति ।
	फलानि कुत्र सन्ति? फलानि वृक्षे सन्ति ।
	अशोकः कुत्र अस्ति? अशोकः नौकायाम् अस्ति ।
	पुस्तकं कुत्र अस्ति? पुस्तकं हस्ते अस्ति ।
	पादत्राणं कुत्र अस्ति? पादत्राणं पादे अस्ति ।

सप्तमी विभक्तिः – कोष्ठकः

एकवचनम्	बहुवचनम्	एकवचनम्	बहुवचनम्
बालके	बालकेषु	बालिकायाम्	बालिकासु
कवौ	कवीषु	युवतौ	युवतीषु
गुरौ	गुरुषु	धेनौ	धेनुषु
पितरि	पितृषु	मातरि	मातृषु
भवति	भवत्सु	भवत्याम्	भवतीषु

अभ्यासः

रिक्तस्थानानि पूरयतु ।

१. अहं ____________ (विद्यालयः) पठामि ।

२. भवान् ____________ (गृहम्) वसति ।

३. भवती ____________ (पुस्तकम्) लिखति ।

४. ____________ (वनम्) सिंहः अस्ति ।

५. ____________ (बिलम्) सर्पः अस्ति ।

६. ____________ (गुरुः) मम भक्तिः अस्ति ।

७. ____________ (नदी) अधिकं जलं नास्ति ।

८. धनं ____________ (पेटिका) अस्ति ।

सुभाषितम्

पिण्डे पिण्डे मतिर्भिन्ना कुण्डे कुण्डे नवं पयः ।
जातौ जातौ नावाचारा नवा वाणी मुखे मुखे ॥

३६. संबोधनम्

अशोकः - मित्र महेश, मम गृहे भवतः स्वागतम् अस्ति ।

महेशः - अशोक, अद्य भवतः जन्मदिनम् इति महान् सन्तोषः ।

अशोकः - मित्र, अन्तः आगच्छतु । आसने उपविशतु ।

महेशः - अस्तु मित्र । उपविशामि ।

अशोकः - मम माता, पिता, भगिनी अपि गृहे सन्ति । सर्वे मिलित्वा उत्सवम् आचरामः ।

महेशः - उत्तमम् । सर्वान् अत्र आह्वयतु ।

अशोकः - हे मातः, पितः, भगिनि, सर्वे अत्र आगच्छन्तु ।

पिता - पुत्र अशोक, जन्मदिनस्य शुभाशयाः ।

माता - आम्, वयं मधुरम् खादामः ।

भगिनी - सर्वे मिलित्वा गीतम् अपि गायामः ।

संबोधनरूपाणि – कोष्ठकः

एकवचनम्	बहुवचनम्	एकवचनम्	बहुवचनम्
बालक	बालकाः	बालिके	बालिकाः
मित्र	मित्राणि	भगिनि	भगिन्यः
कवे	कवयः	युवते	युवतयः
गुरो	गुरवः	धेनो	धेनवः
पितः	पितरः	मातः	मातरः

३७. पञ्चमी विभक्तिः

	बालिका शयनात् उत्तिष्ठति ।
	विमानं नगरात् निर्गच्छति ।
	मूषकः मार्जारात् बिभेति ।

अभ्यासः

रिक्तस्थानानि पूरयतु ।

१. अहं ____________ (विद्यालयः) आगच्छामि ।

२. नदी ____________ (पर्वतः) वहति ।

३. फलं ____________ (वृक्षः) पतति ।

४. छात्रः ____________ (स्यूतः) पुस्तकं ददाति ।

५. ____________ (व्याघ्रः) शृगालः बिभेति ।

६. वानरः ____________ (वृक्षः) वृक्षं गच्छति ।

७. नौका ____________ (द्वीपः) द्वीपं गच्छति ।

८. सर्पः ____________ (बिलम्) बहिः आगच्छति ।

९. सुमा ____________ (गृहम्) ग्रन्थालयं गच्छति ।

पञ्चमी विभक्तिः – कोष्ठकः

एकवचनम्	बहुवचनम्	एकवचनम्	बहुवचनम्
बालकात्	बालकेभ्यः	बालिकायाः	बालिकाभ्यः
कवेः	कविभ्यः	युवतेः	युवतिभ्यः
गुरोः	गुरुभ्यः	धेनोः	धेनुभ्यः
पित्रोः	पितृभ्यः	मात्रोः	मातृभ्यः
भवतः	भवद्भ्यः	भवत्याः	भवतीभ्यः

संभाषणम्

लता – हे मालति, कथम् अस्ति भवती?

मालती – लते, अहं सम्यक् । भवती अत्र विमानस्थानके किं करोति?

लता – मम मातुलः अद्य विमानेन आगच्छति । अहं तं स्थानकात् गृहं नयामि ।

मालती – लते, भवत्याः मातुलः कुतः आगच्छति?

लता – सः सिंहपुरात् आगच्छति । भवती किमर्थम् अत्र?

मालती – मम पितामही इतः रजतपुरं निर्गच्छति ।

लता – मालति, पश्यतु । तत् बृहत् विमानम् आकाशात् अवतरति । मम मातुलः तस्मात् विमानात् बहिः आगच्छति ।

मालती – अस्तु । मम पितामह्याः विमानम् अपि यानाय सिद्धम् अस्ति। अहं तत्र गच्छामि ।

३८. दूरतः, समीपतः

१. कमला कार्यालय**तः** आगच्छति ।

२. उमेशः विद्यालय**तः** ग्रन्थालयं गच्छति ।

३. वाहनस्थानक**तः** भवती कुत्र गच्छति?

४. रमेशः दूर**तः** अशोकम् आह्वयति ।

५. पर्वतस्य समीप**तः** शब्दः आगच्छति ।

३९. संबन्धवाचकपदानि

पौत्रः	पुत्रस्य पुत्रः	दौहित्रः	पुत्र्याः पुत्रः
पौत्री	पुत्रस्य पुत्री	दौहित्री	पुत्र्याः पुत्री
प्रपौत्रः	पौत्रस्य पुत्रः	प्रपौत्री	पौत्रस्य पुत्री
पितामहः	पितुः पिता	मातामहः	मातुः पिता
पितामही	पितुः माता	मातामही	मातुः माता
प्रपितामहः	पितामहस्य पिता	प्रमातामहः	मातामहस्य पिता
पितृव्यः	पितुः भ्राता	मातुलः	मातुः भ्राता
पितृव्या	पितृव्यस्य पत्नी	मातुलानी	मातुलस्य पत्नी
जामाता	पुत्र्याः पतिः	स्नुषा	पुत्रस्य पत्नी
श्वशुरः	पत्युः/पत्न्याः पिता	श्वश्रूः	पत्युः/पत्न्याः माता
देवरः	पत्युः भ्राता	श्यालः	पत्न्याः भ्राता
ननान्दा	पत्युः भगिनी	आवुत्तः	भगिन्याः पतिः
पितृष्वसा	पितुः भगिनी	भागिनेयः	भगिन्याः पुत्रः

४०. भूतकालः

वर्तमानकालः	भूतकालः
अद्य विरामदिनम् अस्ति ।	ह्यः विरामदिनम् आसीत् ।
सेवकाः भवने सन्ति ।	सेवकाः भवने आसन् ।
अद्य अहं गृहे अस्मि ।	ह्यः अहं गृहे आसम् ।
अद्य वयं क्रीडाङ्गणे स्मः ।	ह्यः वयं क्रीडाङ्गणे आस्म ।
अद्य राष्ट्रोत्सवः भवति ।	ह्यः राष्ट्रोत्सवः अभवत् ।
भवान् विद्यालयं गच्छति ।	भवान् विद्यालयं गतवान् ।
भवती पुस्तकं पठति ।	भवती पुस्तकं पठितवती ।
बालिकाः भोजनं खादन्ति ।	बालिका भोजनं खादितवत्यः ।

भूतकालरूपाणि – कोष्ठकः

	भूतकालरूपम् (क्तवतु-रूपम्)			
वर्तमानकालः	पुल्लिङ्गम्		स्त्रीलिङ्गम्	
एकवचनम्	एकवचनम्	बहुवचनम्	एकवचनम्	बहुवचनम्
पठति	पठितवान्	पठितवन्तः	पठितवती	पठितवत्यः
क्रीडति	क्रीडितवान्	क्रीडितवन्तः	क्रीडितवती	क्रीडितवत्यः
लिखति	लिखितवान्	लिखितवन्तः	लिखितवती	लिखितवत्यः
खादति	खादितवान्	खादितवन्तः	खादितवती	खादितवत्यः
मिलति	मिलितवान्	मिलितवन्तः	मिलितवती	मिलितवत्यः

हसति	हसितवान्	हसितवन्तः	हसितवती	हसितवत्यः
निन्दति	निन्दितवान्	निन्दितवन्तः	निन्दितवती	निन्दितवत्यः
धावति	धावितवान्	धावितवन्तः	धावितवती	धावितवत्यः
पतति	पतितवान्	पतितवन्तः	पतितवती	पतितवत्यः
नयति	नीतवान्	नीतवन्तः	नीतवती	नीतवत्यः
आनयति	आनीतवान्	आनीतवन्तः	आनीतवती	आनीतवत्यः
वदति	उदितवान्	उदितवन्तः	उदितवती	उदितवत्यः
स्मरति	स्मृतवान्	स्मृतवन्तः	स्मृतवती	स्मृतवत्यः
गच्छति	गतवान्	गतवन्तः	गतवती	गतवत्यः
इच्छति	इष्टवान्	इष्टवन्तः	इष्टवती	इष्टवत्यः
उत्तिष्ठति	उत्थितवान्	उत्थितवन्तः	उत्थितवती	उत्थितवत्यः
पिबति	पीतवान्	पीतवन्तः	पीतवती	पीतवत्यः
त्यजति	त्यक्तवान्	त्यक्तवन्तः	त्यक्तवती	त्यक्तवत्यः
पश्यति	दृष्टवान्	दृष्टवन्तः	दृष्टवती	दृष्टवत्यः
उपविशति	उपविष्टवान्	उपविष्टवन्तः	उपविष्टवती	उपविष्टवत्यः
ददाति	दत्तवान्	दत्तवन्तः	दत्तवती	दत्तवत्यः
पृच्छति	पृष्टवान्	पृष्टवन्तः	पृष्टवती	पृष्टवत्यः
क्रीणाति	क्रीतवान्	क्रीतवन्तः	क्रीतवती	क्रीतवत्यः

जानाति	ज्ञातवान्	ज्ञातवन्तः	ज्ञातवती	ज्ञातवत्यः
करोति	कृतवान्	कृतवन्तः	कृतवती	कृतवत्यः
स्वीकरोति	स्वीकृतवान्	स्वीकृतवन्तः	स्वीकृतवती	स्वीकृतवत्यः
शृणोति	श्रुतवान्	श्रुतवन्तः	श्रुतवती	श्रुतवत्यः
रोदिति	रुदितवान्	रुदितवन्तः	रुदितवती	रुदितवत्यः
शक्नोति	शक्तवान्	शक्तवन्तः	शक्तवती	शक्तवत्यः
पूजयति	पूजितवान्	पूजितवन्तः	पूजितवती	पूजितवत्यः
प्रेषयति	प्रेषितवान्	प्रेषितवन्तः	प्रेषितवती	प्रेषितवत्यः
प्रक्षालयति	प्रक्षालितवान्	प्रक्षालितवन्तः	प्रक्षालितवती	प्रक्षालितवत्यः
स्थापयति	स्थापितवान्	स्थापितवन्तः	स्थापितवती	स्थापितवत्यः
सूचयति	सूचितवान्	सूचितवन्तः	सूचितवती	सूचितवत्यः
आह्वयति	आहूतवान्	आहूतवन्तः	आहूतवती	आहूतवत्यः
तिष्ठति	स्थितवान्	स्थितवन्तः	स्थितवती	स्थितवत्यः
वसति	उषितवान्	उषितवन्तः	उषितवती	उषितवत्यः
प्राप्नोति	प्राप्तवान्	प्राप्तवन्तः	प्राप्तवती	प्राप्तवत्यः
नृत्यति	नृत्तवान्	नृत्तवन्तः	नृत्तवती	नृत्तवत्यः
चलति	चलितवान्	चलितवन्तः	चलितवती	चलितवत्यः
गायति	गीतवान्	गीतवन्तः	गीतवती	गीतवत्यः

संभाषणम्

अमितः – भोः रवि, कथम् अस्ति भवान्?

रविः – अहं सम्यक् अस्मि । भवान् कथम्?

अमितः – ह्यः सायं कुत्र गतवान् भवान्?

रविः – ह्यः अहं भोजनालयं गतवान् ।

अमितः – भवता सह अन्ये के गतवन्तः?

रविः – मया सह रमेशः गणेशः सुमा च आगतवन्तः ।

अमितः – लता न आगतवती किम्?

रविः – लता न आगतवती । अहं लतां पृष्टवान् । तस्याः गृहाभ्यासः अस्ति इति सा उक्तवती ।

अमितः - भोजनालये भवन्तः किं खादितवन्तः?

रविः – तत्र वयं रोटिकाः क्वथितं पायसं च खादितवन्तः । रमेशः तक्रं पीतवान् । सुमा किञ्चित् खाद्यं गृहं नीतवती ।

अमितः – भोजनस्य कियत् धनं दत्तवान्?

रविः – अशीतिरूप्यकाणि दत्तवान् ।

अमितः – अनन्तरं किं कृतवन्तः?

रविः – अनन्तरं वयं विपणिं गतवन्तः ।

अमितः – विपण्यां किं क्रीतवन्तः?

रविः – तत्र गणेशः युतकानि क्रीतवान् ।

अमितः – अनन्तरं किं कृतवन्तः?

रविः – ततः वयं सर्वे गृहं प्राप्तवन्तः ।

अभ्यासः

रेखाङ्कितपदानां भूतकालरूपे परिवर्तनं करोतु ।

एकः काकः अस्ति । तस्य बहु दाहः भवति । सः एकं घटं पश्यति। घटस्य उपरि उपविशति । सः घटे किञ्चित् जलं पश्यति। काकः एकम् उपायं करोति। सः शिलाखण्डान् आनयति। सः शिलाखण्डान् घटे स्थापयति। सः जलं प्राप्नोति। काकः जलं पिबति। सः गच्छति।

४१. भूतकाले स्म

अशोकः - लते, ह्यः चक्रयाने भवतीम् अहं दृष्टवान् । भवती कुत्र गच्छति स्म?

लता - अशोक, ह्यः अहं प्राणिसंग्रहालयं गतवती ।

अशोकः - लते, भवती तत्र किं दृष्टवती?

लता - तत्र अनेके पशवः आसन् । एकः गजः मन्दं चलति स्म । सः इक्षुदण्डं खादति स्म । वानराः वृक्षेषु क्रीडन्ति स्म ।

अशोकः - तत्र सिंहः अपि आसीत् किम्?

लता – तत्र सिंहः अपि आसीत् । सः उच्चैः गर्जति स्म । न केवलं सिंहः । व्याघ्रः, हरिणाः, उष्ट्राः, शृगालाः, चित्रकः अपि आसन्।

अशोकः - हरिणाः किं कुर्वन्ति स्म? उष्ट्राः किं कुर्वन्ति स्म?

लता - हरिणाः तृणं खादन्ति स्म । उष्ट्राः जलं पिबन्ति स्म ।

अशोकः - किं खगान् अपि दृष्टवती तत्र? ते किं कुर्वन्ति स्म?

लता - खगान् अपि दृष्टवती। ते वृक्षाणां शाखासु कूजन्ति स्म ।

अशोकः - सुन्दरम् । अहम् अपि श्वः तत्र गच्छामि ।

४२. क्रियापदानि - भविष्यत्-कालः

वर्तमानकालः	भविष्यत्-कालः
अद्य विरामदिनम् अस्ति ।	श्वः विरामदिनम् भविष्यति ।
सेवकाः भवने सन्ति ।	सेवकाः भवने भविष्यन्ति ।
अद्य अहं गृहे अस्मि ।	श्वः अहं गृहे भविष्यामि ।
अद्य वयं क्रीडाङ्गणे स्मः ।	श्वः वयं क्रीडाङ्गणे भविष्यामः ।
अद्य राष्ट्रोत्सवः भवति ।	श्वः राष्ट्रोत्सवः भविष्यति ।
भवान् विद्यालयं गच्छति ।	भवान् विद्यालयं गमिष्यति ।
भवती पुस्तकं पठति ।	भवती पुस्तकं पठिष्यति ।
बालिकाः भोजनं खादन्ति ।	बालिकाः भोजनं खादिष्यन्ति ।

भविष्यत्-कालरूपाणि कोष्ठकः

	भविष्यत्-कालरूपाणि			
	सः/सा/अन्यः	ते/ताः/अन्ये	अहम्	वयम्
वर्तमानकालः	एकवचनम्	बहुवचनम्	एकवचनम्	बहुवचनम्
भवति	भविष्यति	भविष्यन्ति	भविष्यामि	भविष्यामः
अस्ति	भविष्यति	भविष्यन्ति	भविष्यामि	भविष्यामः
पठति	पठिष्यति	पठिष्यन्ति	पठिष्यामि	पठिष्यामः
क्रीडति	क्रीडिष्यति	क्रीडिष्यन्ति	क्रीडिष्यामि	क्रीडिष्यामः
लिखति	लेखिष्यति	लेखिष्यन्ति	लेखिष्यामि	लेखिष्यामः

खादति	खादिष्यति	खादिष्यन्ति	खादिष्यामि	खादिष्यामः
मिलति	मेलिष्यति	मेलिष्यन्ति	मेलिष्यामि	मेलिष्यामः
हसति	हसिष्यति	हसिष्यन्ति	हसिष्यामि	हसिष्यामः
निन्दति	निन्दिष्यति	निन्दिष्यन्ति	निन्दिष्यामि	निन्दिष्यामः
धावति	धाविष्यति	धाविष्यन्ति	धाविष्यामि	धाविष्यामः
पतति	पतिष्यति	पतिष्यन्ति	पतिष्यामि	पतिष्यामः
नयति	नेष्यति	नेष्यन्ति	नेष्यामि	नेष्यामः
आनयति	आनेष्यति	आनेष्यन्ति	आनेष्यामि	आनेष्यामः
वदति	वदिष्यति	वदिष्यन्ति	वदिष्यामि	वदिष्यामः
स्मरति	स्मरिष्यति	स्मरिष्यन्ति	स्मरिष्यामि	स्मरिष्यामः
गच्छति	गमिष्यति	गमिष्यन्ति	गमिष्यामि	गमिष्यामः
इच्छति	एषिष्यति	एषिष्यन्ति	एषिष्यामि	एषिष्यामः
उत्तिष्ठति	उत्थास्यति	उत्थास्यन्ति	उत्थास्यामि	उत्थास्यामः
पिबति	पास्यति	पास्यन्ति	पास्यामि	पास्यामः
त्यजति	त्यक्ष्यति	त्यक्ष्यन्ति	त्यक्ष्यामि	त्यक्ष्यामः
पश्यति	द्रक्ष्यति	द्रक्ष्यन्ति	द्रक्ष्यामि	द्रक्ष्यामः
उपविशति	उपवेक्ष्यति	उपवेक्ष्यन्ति	उपवेक्ष्यामि	उपवेक्ष्यामः
ददाति	दास्यति	दास्यन्ति	दास्यामि	दास्यामः

पृच्छति	प्रक्ष्यति	प्रक्ष्यन्ति	प्रक्ष्यामि	प्रक्ष्यामः
क्रीणाति	क्रेष्यति	क्रेष्यन्ति	क्रेष्यामि	क्रेष्यामः
जानाति	ज्ञास्यति	ज्ञास्यन्ति	ज्ञास्यामि	ज्ञास्यामः
करोति	करिष्यति	करिष्यन्ति	करिष्यामि	करिष्यामः
शृणोति	श्रोष्यति	श्रोष्यन्ति	श्रोष्यामि	श्रोष्यामः
रोदिति	रोदिष्यति	रोदिष्यन्ति	रोदिष्यामि	रोदिष्यामः
शक्नोति	शक्ष्यति	शक्ष्यन्ति	शक्ष्यामि	शक्ष्यामः
पूजयति	पूजयिष्यति	पूजयिष्यन्ति	पूजयिष्यामि	पूजयिष्यामः
प्रेषयति	प्रेषयिष्यति	प्रेषयिष्यन्ति	प्रेषयिष्यामि	प्रेषयिष्यामः
स्थापयति	स्थापयिष्यति	स्थापयिष्यन्ति	स्थापयिष्यामि	स्थापयिष्यामः
आह्वयति	आह्वास्यति	आह्वास्यन्ति	आह्वास्यामि	आह्वास्यामः
तिष्ठति	स्थास्यति	स्थास्यन्ति	स्थास्यामि	स्थास्यामः
वसति	वत्स्यति	वत्स्यन्ति	वत्स्यामि	वत्स्यामः
प्राप्नोति	प्राप्स्यति	प्राप्स्यन्ति	प्राप्स्यामि	प्राप्स्यामः
नृत्यति	नर्तिष्यति	नर्तिष्यन्ति	नर्तिष्यामि	नर्तिष्यामः
गायति	गास्यति	गास्यन्ति	गास्यामि	गास्यामः
यच्छति	दास्यति	दास्यन्ति	दास्यामि	दास्यामः
गर्जति	गर्जिष्यति	गर्जिष्यन्ति	गर्जिष्यामि	गर्जिष्यामः

अभ्यासः

रेखाङ्कितपदानां भविष्यत्कालरूपाणि लिखतु ।

सुमा - रमे, भवत्याः गायनकार्यक्रमः कदा <u>भवति</u>?

रमा – मम कार्यक्रमः शुक्रवासरे <u>अस्ति</u> ।

सुमा – तदा वेणुवादनं कः <u>करोति</u>?

रमा – वेणुवादनम् अमरः <u>करोति</u> ।

सुमा – महेशः कार्यक्रमे <u>नृत्यति</u> किम्?

रमा – न, सुरेशः वीणां <u>वादयति</u> ।

सुमा – अन्ये के <u>आगच्छन्ति</u>?

रमा – मम मातामहः प्रायः <u>आगच्छति</u> । मातामही अनन्तरं <u>सूचयति</u>।

सुमा – अहं मम पुत्रम् अपि <u>आनयामि</u> ।

रमा – अस्तु । वयं सर्वे कार्यक्रमे <u>मिलामः</u> ।

भविष्यत्कालरूपाणि लिखतु ।

अहं गतवान् ।	____________________
वयं दृष्टवन्तः ।	____________________
सः लिखति ।	____________________
सा क्रीडति ।	____________________
वानरः कूर्दति ।	____________________
सिंहः गर्जति ।	____________________
जनाः वदन्ति ।	____________________

४३. त्त्वान्त-रूपाणि

<table>
<tr><td>बालकः भोजनं खादति ।</td><td>अनन्तरम्</td><td>बालकः निद्राति ।</td></tr>
<tr><td colspan="3">बालकः भोजनं खादित्वा निद्राति ।</td></tr>
<tr><td>छात्रा स्यूतं गृह्णाति ।</td><td>अनन्तरम्</td><td>छात्रा विद्यालयं गच्छति ।</td></tr>
<tr><td colspan="3">छात्रा स्यूतं गृहीत्वा विद्यालयं गच्छति ।</td></tr>
<tr><td>मुनिः स्नाति ।</td><td>अनन्तरम्</td><td>मुनिः जपति ।</td></tr>
<tr><td colspan="3">मुनिः स्नात्वा जपति ।</td></tr>
<tr><td>मृगः व्याघ्रं पश्यति ।</td><td>अनन्तरम्</td><td>मृगः धावति ।</td></tr>
<tr><td colspan="3">मृगः व्याघ्रं दृष्ट्वा धावति ।</td></tr>
<tr><td>पिता अन्नं खादितवान् ।</td><td>अनन्तरम्</td><td>पिता कार्यालयं गतवान् ।</td></tr>
<tr><td colspan="3">पिता अन्नं खादित्वा कार्यालयं गतवान् ।</td></tr>
<tr><td>अश्वः धाविष्यति ।</td><td>अनन्तरम्</td><td>अश्वः जलं पास्यति ।</td></tr>
<tr><td colspan="3">अश्वः धावित्वा जलं पास्यति ।</td></tr>
<tr><td>मित्राणि गृहं गच्छन्ति ।</td><td>अनन्तरम्</td><td>मित्राणि क्रीडन्ति ।</td></tr>
<tr><td colspan="3">मित्राणि गृहं गत्वा क्रीडन्ति ।</td></tr>
<tr><td>बालिकाः नर्तिष्यन्ति ।</td><td>अनन्तरम्</td><td>बालिकाः गास्यन्ति ।</td></tr>
<tr><td colspan="3">बालिकाः नर्तित्वा गास्यन्ति ।</td></tr>
<tr><td>भवन्तः कथां शृण्वन्ति ।</td><td>अनन्तरम्</td><td>भवन्तः हसन्ति ।</td></tr>
<tr><td colspan="3">भवन्तः कथां श्रुत्वा हसन्ति ।</td></tr>
<tr><td>भवत्यः पठिष्यन्ति ।</td><td>अनन्तरम्</td><td>भवत्यः लेखिष्यन्ति ।</td></tr>
<tr><td colspan="3">भवत्यः पठित्वा लेखिष्यन्ति ।</td></tr>
</table>

४४. ल्यबन्त-रूपाणि

<table>
<tr><td>बालकः मित्रं आह्वयति ।</td><td>अनन्तरम्</td><td>बालकः क्रीडति ।</td></tr>
<tr><td colspan="3">बालकः मित्रं आहूय क्रीडति ।</td></tr>
<tr><td>ग्राहकः आपणं प्राप्नोति ।</td><td>अनन्तरम्</td><td>ग्राहकः पुस्तकं क्रीणाति ।</td></tr>
<tr><td colspan="3">ग्राहकः आपणं प्राप्य पुस्तकं क्रीणाति ।</td></tr>
<tr><td>मुनिः आसने उपविशति ।</td><td>अनन्तरम्</td><td>मुनिः जपति ।</td></tr>
<tr><td colspan="3">मुनिः आसने उपविश्य जपति ।</td></tr>
<tr><td>बालिकाः उत्तिष्ठन्ति ।</td><td>अनन्तरम्</td><td>बालिकाः देवं पूजयन्ति ।</td></tr>
<tr><td colspan="3">बालिकाः उत्थाय देवं पूजयन्ति ।</td></tr>
<tr><td>भवान् लेखनीम् आनयति ।</td><td>अनन्तरम्</td><td>भवान् लिखति ।</td></tr>
<tr><td colspan="3">भवान् लेखनीम् आनीय लिखति ।</td></tr>
<tr><td>आपणिकः धनं स्वीकरोति ।</td><td>अनन्तरम्</td><td>आपणिकः आभरणं ददाति ।</td></tr>
<tr><td colspan="3">आपणिकः धनं स्वीकृत्य आभरणं ददाति ।</td></tr>
<tr><td>माता गृहं गच्छति ।</td><td>अनन्तरम्</td><td>माता भोजनं खादति ।</td></tr>
<tr><td colspan="3">माता गृहं गत्वा भोजनं खादति ।</td></tr>
<tr><td>धीवरः जलाशयं गच्छति ।</td><td>अनन्तरम्</td><td>धीवरः मत्स्यं गृह्णाति ।</td></tr>
<tr><td colspan="3">धीवरः जलाशयं गत्वा मत्स्यं गृह्णाति ।</td></tr>
<tr><td>महेशः मन्दिरं गतवान् ।</td><td>अनन्तरम्</td><td>महेशः चित्रं दृष्टवान् ।</td></tr>
<tr><td colspan="3">महेशः मन्दिरं गत्वा चित्रं दृष्टवान् ।</td></tr>
<tr><td>रमा मन्दिरं गमिष्यति ।</td><td>अनन्तरम्</td><td>रमा चित्रं द्रक्ष्यति ।</td></tr>
<tr><td colspan="3">रमा मन्दिरं गत्वा चित्रं द्रक्ष्यति ।</td></tr>
</table>

अभ्यासः

क्त्वान्तरूपं ल्यबन्तरूपं वा उपयुज्य एतानि वाक्यानि लिखतु ।

१. अहं चित्रमन्दिरं गच्छामि । अहं चित्रं पश्यामि ।
२. भवान् आसने उपविशति । भवान् दुग्धं पिबति ।
३. भवती हस्तं क्षालयति । भवती भोजनं करोति ।
४. सः वाहनं चालयति । सः आपणं गच्छति ।
५. धेनुः वत्सम् आह्वयति । धेनुः वनं गच्छति ।
६. जया गीतं गायति । जया नृत्यति ।
७. अशोकः प्रकोष्ठं संमार्जयति । अशोकः स्नाति ।
८. हरिः पुस्तकं पश्यति । हरिः उत्तरं लिखति ।
९. छात्रा प्रश्नं पृच्छति । छात्रा उत्तरं लिखति ।
१०. रामः वाहनं स्थापयति । रामः अन्तः आगच्छति ।
११. गिरीशः गृहात् निर्गच्छति । गिरीशः क्रीडाङ्गणं प्राप्नोति ।
१२. मालती आपणं प्राप्तवती । मालती शाकं क्रीतवती ।
१३. नरेन्द्रः शाकं क्रीतवान् । नरेन्द्रः गृहं गतवान् ।
१४. जगदीशः प्रातः उत्थास्यति । जगदीशः धाविष्यति ।
१५. नीला नर्तिष्यति । नीला गृहम् आगमिष्यति ।
१६. जनाः देवं पूजयन्ति । जनाः भोजनं कुर्वन्ति ।
१७. भवन्तः द्वारे तिष्ठन्ति । भवन्तः शब्दं कुर्वन्ति ।
१८. वानराः कूर्दन्ति । वानराः क्रीडन्ति ।
१९. वयं भवन्तं सूचयामः । वयं गृहम् आगच्छामः ।

४५. तुमुन्नन्त-रूपाणि

मित्रम् आगच्छति ।	किमर्थम्?	मित्रं मया सह मिलति ।
मित्रं मया सह मेलितुम् आगच्छति ।		
छात्रा स्यूतं गृह्णाति ।	किमर्थम्?	छात्रा विद्यालयं गच्छति ।
छात्रा विद्यालयं गन्तुं स्यूतं गृह्णाति ।		
मुनिः नदीं गच्छति ।	किमर्थम्?	मुनिः स्नाति ।
मुनिः स्नातुं नदीं गच्छति ।		
व्याघ्रः मृगं मारयति ।	किमर्थम्?	व्याघ्रः मृगं खादति ।
व्याघ्रः खादितुं मृगं मारयति ।		
पिता प्रश्नं पृष्टवान्।	किमर्थम्?	पिता उत्तरं ज्ञातवान् ।
पिता उत्तरं ज्ञातुं प्रश्नं पृष्टवान् ।		
अश्वः धाविष्यति ।	किमर्थम्?	अश्वः जलं पास्यति ।
अश्वः जलं पातुं धाविष्यति ।		
मित्राणि गृहं गच्छन्ति ।	किमर्थम्?	मित्राणि क्रीडन्ति ।
मित्राणि क्रीडितुं गृहं गच्छन्ति ।		
बालिकाः नर्तिष्यन्ति ।	किमर्थम्?	बालिकाः संतोषं प्राप्स्यन्ति ।
बालिकाः संतोषं प्राप्तुं नर्तिष्यन्ति ।		
भवन्तः कथां श्रृण्वन्ति ।	किमर्थम्?	भवन्तः हसन्ति ।
भवन्तः हसितुं कथां श्रृण्वन्ति ।		
भवत्यः पठिष्यन्ति ।	किमर्थम्?	भवत्यः लेखिष्यन्ति ।
भवत्यः लेखितुं पठिष्यन्ति ।		

अभ्यासः

तुमुन्नन्तरूपं उपयुज्य एतानि वाक्यानि लिखतु ।

१. अहं चित्रमन्दिरं गच्छामि । अहं चित्रं पश्यामि ।

२. भवान् आसने उपविशति । भवान् दुग्धं पिबति ।

३. भवती हस्तं क्षालयति । भवती भोजनं करोति ।

४. सः युतकं धरति । सः आपणं गच्छति ।

५. धेनुः वत्सम् आह्वयति । धेनुः वनं गच्छति ।

६. जया बहिः गच्छति । जया नृत्यति ।

७. अशोकः फेनकम् आनयति । अशोकः स्नाति ।

८. हरिः पुस्तकं पश्यति । हरिः उत्तरं लिखति ।

९. छात्रा प्रश्नं पृच्छति । छात्रा उत्तरं लिखति ।

१०. रामः वाहनं स्थापयति । रामः अन्तः आगच्छति ।

११. गिरीशः गृहात् निर्गच्छति । गिरीशः क्रीडाङ्गणं प्राप्नोति ।

१२. मालती आपणं प्राप्तवती । मालती शाकं क्रीतवती ।

१३. नरेन्द्रः धनं दत्तवान् । नरेन्द्रः शाकं क्रीतवान् ।

१४. जगदीशः प्रातः उत्थास्यति । जगदीशः धाविष्यति ।

१५. सैनिकः युद्धभूमिं गच्छति । सैनिकः युद्ध्यति ।

१६. जनाः देवालयं गच्छन्ति । जनाः देवं पूजयन्ति ।

१७. भवन्तः द्वारे तिष्ठन्ति । भवन्तः शब्दं कुर्वन्ति ।

१८. वानराः कूर्दन्ति । वानराः क्रीडन्ति ।

१९. वयं भवन्तं सूचयामः । वयं गृहम् आगच्छामः ।

त्वा/ल्यप्/तुम्-रूपाणि कोष्ठकः

वर्तमानकालः	क्त्वान्त/ल्यबन्त-रूपम्	तुमुन्नन्त-रूपम्
भवति	भूत्वा	भवितुम्
अस्ति	भूत्वा	भवितुम्
पठति	पठित्वा	पठितुम्
क्रीडति	क्रीडित्वा	क्रीडितुम्
लिखति	लिखित्वा	लेखितुम्
खादति	खादित्वा	खादितुम्
मिलति	मिलित्वा	मेलितुम्
हसति	हसित्वा	हसितुम्
निन्दति	निन्दित्वा	निन्दितुम्
धावति	धावित्वा	धावितुम्
पतति	पतित्वा	पतितुम्
नयति	नीत्वा	नेतुम्
आनयति	आनीय	आनेतुम्
वदति	उदित्वा	वदितुम्
स्मरति	स्मृत्वा	स्मर्तुम्
गच्छति	गत्वा	गन्तुम्

इच्छति	इष्टवा	एषितुम्
उत्तिष्ठति	उत्थाय	उत्थातुम्
पिबति	पीत्वा	पातुम्
त्यजति	त्यक्त्वा	त्यक्तुम्
पश्यति	दृष्ट्वा	द्रष्टुम्
उपविशति	उपविश्य	उपवेष्टुम्
ददाति	दत्वा	दातुम्
पृच्छति	पृष्ट्वा	प्रष्टुम्
क्रीणाति	क्रीत्वा	क्रेतुम्
जानाति	ज्ञात्वा	ज्ञातुम्
करोति	कृत्वा	कर्तुम्
स्वीकरोति	स्वीकृत्य	स्वीकर्तुम्
श्रृणोति	श्रुत्वा	श्रोतुं
रोदिति	रुदित्वा	रोदितुम्
शक्नोति	शक्त्वा	शक्तुम्
पूजयति	पूजयित्वा	पूजयितुम्
प्रेषयति	प्रेषयित्वा	प्रेषयितुम्
प्रक्षालयति	प्रक्षाल्य	प्रक्षालयितुम्

स्थापयति	स्थापयित्वा	स्थापयितुम्
तर्जति	तर्जित्वा	तर्जितुम्
सूचयति	सूचयित्वा	सूचयितुम्
आह्वयति	आहूय	आह्वातुम्
तिष्ठति	स्थित्वा	स्थातुम्
वसति	उषित्वा	वस्तुम्
विशति	विष्ट्वा	वेष्टुम्
प्राप्नोति	प्राप्य	प्राप्तुम्
नृत्यति	नर्तित्वा	नर्तितुम्
चलति	चलित्वा	चलितुम्
गायति	गीत्वा	गातुम्

४६. अद्यतन, श्वस्तन

महेशः - पुत्रि लते, इदानीं भवती किं करोति?

लता - पितः, इदानीम् अहं दूरदर्शनं पश्यामि ।

महेशः - दूरदर्शने इदानीं किं प्रचलति?

लता - दूरदर्शने अद्यतनवार्ताः इति कार्यक्रमः प्रचलति ।

महेशः - वार्ताः श्रोतुं न इच्छामि । श्वस्तनकार्यक्रमः कः अस्ति?

लता - श्वस्तनकार्यक्रमः वीणावादनम् इति भवति ।

महेशः - अहं अद्य वार्ताः न शृणोमि । श्वः वीणावादनम् शृणोमि ।

४७. च, एव, अपि, इति, तु, सम्यक्

महेशः - मित्र हरे, श्वः वयं मित्राणि मिलित्वा समुद्रतीरं गमिष्यामः ।

हरिः – उत्तमम् । समुद्रतीरं गत्वा किं कर्तुम् इच्छति भवान्?

महेशः – तत्र गत्वा नौकाविहारं करिष्यामः । कन्दुकेन क्रीडामः ।

हरिः – अस्तु । के आगन्तुम् इच्छन्ति इति इदानीं दूरवाण्यां पृच्छामि ।

महेशः – आम् । पृच्छतु कृपया ।

हरिः – अहं रामं अशोकं विवेकं लतां च पृष्टवान् ।

महेशः – किं उक्तवन्तः ते?

हरिः – रामः अशोकः लता च आगन्तुं शक्नुवन्ति इति उक्तवन्तः ।

महेशः - विवेकः किमर्थं न आगन्तुं शक्नोति?

हरिः – तस्य संस्कृतवर्गः अस्ति इति विवेकः सूचितवान् ।

महेशः – नास्ति चिन्ता । वयं पञ्च जनाः एव गमिष्यामः ।

हरिः – श्वः तत्र कदा प्राप्तुम् इच्छसि?

महेशः – श्वः प्रातः अष्टवादने एव गमिष्यावः । अनन्तरं तु आतपः भविष्यति ।

हरिः – सम्यक् । अहं तु नववादने आगमिष्यामि ।

महेशः – भोः, किमर्थं विलम्बः?

हरिः – प्रातः मम भगिनीं विद्यालयं प्रापय्य आगमिष्यामि ।

महेशः – अस्तु । वयं तु तत्र अष्टवादने गमिष्यामः । भवान् अपि शीघ्रम् एव आगच्छतु ।

४८. विरुद्धार्थकशब्दाः, अपेक्षया

	विन्ध्यपर्वतस्य अपेक्षया हिमालयः उन्नतः । हिमालयस्य अपेक्षया विन्ध्यपर्वतः वामनः ।
	लेखनी मापिकायाः अपेक्षया ह्रस्वा अस्ति । मापिका लेखन्याः अपेक्षया दीर्घा अस्ति ।
	उमा लतायाः अपेक्षया उन्नता । लता उमायाः अपेक्षया वामना ।
	सेवफलस्य अपेक्षया द्राक्षाफलं लघु । द्राक्षाफलस्य अपेक्षया सेवफलं बृहत् ।
	चषके अधिकं जलम् अस्ति । द्रोण्यां अल्पं जलम् अस्ति ।

अभ्यासः

अधोलिखितानि पदानि उपयुज्य "अपेक्षया" वाक्यानि लिखतु ।

उष्णम्, पुरातनम्, सरलम्, कृशः, शीतम्, स्थूलः, नूतनम्, कठिनम्

सुभाषितम्

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।

पात्रत्वाद् धनम् आप्नोति धनाद् धर्मं ततः सुखम् ॥

४९. द्वयं प्रयोगः

	एकः पुरुषः अस्ति		पुरुषद्वयम् अस्ति
	एका बालिका अस्ति		बालिकाद्वयम् अस्ति
	एकं फलम् अस्ति		फलद्वयम् अस्ति

अभ्यासः

यथोदाहरणं वाक्यानि लिखतु ।

एकः पुत्रः अस्ति	पुत्रद्वयम् अस्ति
एकः युतकः अस्ति	
एकः वृक्षः अस्ति	
एका महिला अस्ति	
एकः कन्दुकः अस्ति	
एकं पुस्तकम् अस्ति	
एका लेखनी अस्ति	
एका अङ्कनी अस्ति	
एकम् ऊरुकम् अस्ति	
एकः मार्जारः अस्ति	
एकं युतकम् अस्ति	

५०. यत्र, तत्र

१. यत्र सूर्यः भवति तत्र दिनं भवति ।

२. यत्र चन्द्रः भवति तत्र रात्रिः भवति ।

३. यत्र दुर्जनाः भवन्ति तत्र सज्जनाः न भवन्ति ।

४. यत्र इच्छा भवति तत्र मार्गः भवति ।

५. यत्र भवान् गच्छति तत्र अहम् आगच्छामि।

६. यत्र आरक्षकः गच्छति तत्र तस्य शुनकः गच्छति ।

७. यत्र मित्रता भवति तत्र शान्तिः भवति ।

८. यत्र भवती गायति तत्र जनाः आगच्छन्ति ।

९. यत्र मत्स्यः लभ्यते तत्र धीवरः गच्छति ।

१०. यत्र सरोवरः अस्ति तत्र बकाः वसन्ति ।

११. यत्र अध्यापकः पाठितवान् तत्र छात्रः उपविष्टवान् ।

१२. यत्र वृष्टिः अभवत् तत्र अहं न गतवान् ।

अभ्यासः

अधोलिखितानि पदानि उपयुज्य "यत्र-तत्र" वाक्यानि लिखतु ।

परिश्रमः, उष्णम्, मित्रम्, अग्निः, शीतम्, सुखम्, फलम्, धूमः

पदानि योजयतु ।

यत्र नगरम् अस्ति	तत्र चोराः न भवन्ति ।
यत्र शान्तिः अस्ति	तत्र जना भवन्ति ।
यत्र नदी अस्ति	तत्र सुखं भवति ।
यत्र धनं नास्ति	तत्र मत्स्याः भवन्ति ।

५१. यदा, तदा

१. यदा सूर्यः भवति तदा दिनं भवति ।

२. यदा लोकयानं चलति तदा शब्दः भवति ।

३. यदा अहं कार्यं करोमि तदा श्रमः भवति ।

४. यदा भवान् आगच्छति तदा सन्तोषः भवति ।

५. यदा प्रभातः भवति तदा कुक्कुटः कूजति ।

५२. यथा, तथा

१. यथा कूर्मः चलति तथा भवान् चलति ।

२. रामः यथा वदति तथा कार्यं करोति ।

३. यथा भवती गायति तथा अहं न गायामि ।

४. यथा जन्मभूमिः तथा अन्यभूमिः न ।

५. यथा अश्वः धावति तथा गजः न धावति ।

५३. यावत्, तावत्

१. यावत् अश्वस्य वेगः अस्ति तावत् गजस्य वेगः नास्ति ।

२. यावत् अशोकस्य लेखनं सुन्दरं तावत् रमेशस्य नास्ति ।

३. यावत् आम्रफलं मधुरम् अस्ति तावत् सेवफलं मधुरं नास्ति ।

४. यावत् भवती पठति तावत् अहम् अत्र तिष्ठामि ।

५. यावत् सूर्यः अस्ति तावत् प्रकाशः भवति ।

५४. यः,सः,या,सा,यत्,तत्

१. यः गायति सः गायकः ।

२. या शिक्षयति सा शिक्षिका ।

३. यः अभ्यासं करोति सः उत्तीर्णः भवति ।

४. या प्रयत्नं करोति सा फलं प्राप्नोति ।

५. महेशस्य यः गुरुः सः एव अशोकस्य गुरुः ।

६. लतायाः या पाठशाला सा एव उमायाः पाठशाला ।

७. मम समीपे यत् चक्रयानम् अस्ति तत् भवतः समीपे नास्ति ।

५५. यद्यपि, तथापि

१. यद्यपि गजः महाकायः तथापि सः शान्तः ।

२. यद्यपि अहं धावितवान् तथापि समये अहं न प्राप्तवान् ।

३. यद्यपि दीपः अस्ति तथापि प्रकाशः नास्ति ।

४. यद्यपि सज्जनः निर्धनः भवति तथापि सः परोपकारं करोति ।

५६. तः, पर्यन्तम्

१. सोमवासर**तः** बुधवासर**पर्यन्तं** परीक्षा भवति ।

२. मम नगर**तः** देहलीनगर**पर्यन्तं** विमानयानं नास्ति ।

३. चतुर्वादन**तः** अष्टवादन**पर्यन्तं** क्रीडा भवति ।

५७. गत, आगामि

१. **गत**सप्ताहे वर्गः अभवत् । **आगामि**सप्ताहे वर्गः पुनः भविष्यति ।

२. **गत**मासे भवती धनं दत्तवती । **आगामि**मासे किं दास्यति?

३. **गत**वत्सरे विदेशं गतवन्तः । **आगामि**वत्सरे कुत्र गमिष्यामः?

४. **गत**कालस्य चिन्ता मास्तु । **आगामि**कालस्य चिन्तनं भवतु ।

५८. वा

१. अद्य वृष्टिः हिमपातः वा भवति ।

२. पेटिकायां वस्त्रं वा धनं वा अस्ति ।

३. दुग्धम् उष्णं शीतं वा भवतु ।

४. श्वः मम पुत्री गायनं नर्तनं वा करिष्यति ।

५. भवान् चतुर्वादने पञ्चवादने वा आगच्छतु ।

६. रामस्य गृहे शुनकः मार्जारः वा अस्ति ।

५९. परन्तु, किल, प्रायेण, निश्चयेन

रमा – उमे, भवती अद्य कार्यालयम् आगच्छति किल?

उमा – रमे, अद्य अहं प्रायेण कार्यालयम् आगच्छामि ।

रमा – किमर्थम् एवं वदति?

उमा – मम आरोग्यं तावत् सम्यक् नास्ति । परन्तु चिन्ता नास्ति ।

रमा – वैद्यम् अवश्यं पश्यतु ।

उमा – तत् न आवश्यकम् । श्वः निश्चयेन कार्यालयम् आगमिष्यामि ।

रमा – अस्तु । तर्हि श्वः मिलामः ।

अभ्यासः

यदा, तदा, यथा, तथा, यावत्, तावत्, यः सः, अपेक्षया, वा, पर्यन्तम्, परन्तु, किल, शीघ्रम्, मन्दम् पदानि उपयुज्य वाक्यानि पूरयतु ।

शशकः कूर्मः च ।

वने एकः सरोवरः आसीत् । सरोवरे एकः कूर्मः वसति स्म । _______ सूर्योदयः अभवत् _______ एकः शशकः तत्र आगतवान् । _______ शशकः सरोवरस्य तीरम् आगतवान् _______ कूर्मः अपि जलात् बहिः आगतवान् । कूर्मः _______ चलति स्म । कूर्मं दृष्ट्वा शशकः हसितवान् । सः कूर्मम् उक्तवान् – "हे कूर्म, _______ अहं _______ धावामि _______ भवान् न धावति" । कूर्मः उक्तवान् – "भोः शशक, एवं किमर्थं वदति । सरोवर____ पर्वत____ धावनस्पर्धा भवतु । _______ पर्वतं पूर्वं प्राप्नोति _______ विजयं प्राप्नोति । _______ अहं _______ चलामि _______ अहम् एव तत्र पूर्वं प्राप्नोमि। _______ भवान् वदति _______ एव भवतु इति शशकः उक्त्वा धावितुम् आरब्धवान् । कूर्मः अपि चलितुम् आरब्धवान् । _______ शशकः अर्धमार्गम् आगतवान् सः कूर्मं न दृष्टवान् । सः तत्र एव निद्रां गतवान् । _______ कूर्मः विश्रान्तिं विना चलित्वा पर्वतं प्राप्तवान् । शशकः पृष्टवान् - _______ मम वेगः भवतः _______ अधिकः _______ भवान् अत्र कथं पूर्वं प्राप्तवान्? कूर्मः उक्तवान् – वेगः अधिकः भवतु _______ अल्पः । _______ सततं कार्यं करोति _______ एव जयति _______?

६०. यतः, अतः

१. मम गृहं दूरम् अस्ति । अतः अहं विलम्बेन आगच्छामि ।
अहं विलम्बेन आगच्छामि यतः मम गृहं दूरम् अस्ति ।

२. अद्य विरामदिनम् अस्ति । अतः पुत्रः न पठति ।
पुत्रः न पठति यतः अद्य विरामदिनम् अस्ति ।

६१. यदि, तर्हि

१. यदि भवान् पठति तर्हि उत्तीर्णः भविष्यति ।

२. यदि भवती सायं गृहम् आगच्छति तर्हि पुस्तकं पठामः ।

३. यदि वृष्टिः भवति तर्हि जलं लभ्यते ।

४. यदि गुरुः आगच्छति तर्हि पठनं भवति ।

६२. चेत्, नो चेत्

१. भवान् पठति चेत् उत्तीर्णः भविष्यति ।

२. भवती सायं गृहम् आगच्छति चेत् पुस्तकं पठामः ।

३. वृष्टिः भवति चेत् जलं लभ्यते ।

४. गुरुः पाठयति चेत् ज्ञानं भवति । नो चेत् न ।

५. हिमपातः भवति चेत् अत्र तिष्ठामि । नो चेत् गृहं गच्छामि ।

यदि भवान् पठति चेत् उत्तीर्णः भवति ।	✘

अभ्यासः

यदा, तदा, यदि, तर्हि, यथा, तथा, वा, चेत्, नो चेत्, यद्यपि, तथापि पदानि उपयुज्य वाक्यानि पूरयतु ।

सिंहः मूषकः च ।

वने एकः सिंहः वसति स्म । सः एकदा एकं मूषकं हस्तेन गृहीतवान् । मूषकः सिंहस्य भयात् उक्तवान् - भोः वनराज, कृपया मां मुञ्चतु । ______ भवान् मां मुञ्चति ______ अहं भवतः उपकारं करोमि । सिंहः उक्तवान् - हे मूषक, ______ भवतः गात्रं ______ भवतः बुद्धिः । ______ भवता किमपि मम प्रयोजनं नास्ति ______ भवन्तं मुञ्चामि । मूषकः ततः पलायनं कृतवान् । एकदा व्याधस्य जाले सिंहः पतितवान् । सिंहः उच्चैः गर्जितवान् । ______ सिंहस्य गर्जनम् श्रुतवान् ______ मूषकः तत्र आगतवान् । सिंहः मूषकम् उक्तवान् - भवान् शीघ्रं जालं कर्तयति ______ अहं बहिः आगच्छामि । ______ व्याधः आगच्छति । तदा मूषकः दन्तेन जालं कर्तितवान् । सिंहः जालात् बहिः आगतवान् । सः उक्तवान् - भवान् मम मित्रम् । गात्रम् अल्पं बृहत् ______ भवतु । परोपकारः उत्तमगुणः ।

प्रार्थना

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥

इति शम्